
निःश्रेयसम्
संस्कृत-पत्रम्
२




संपादकः

मुनिः सम्यग्दर्शनविजयः

# निःश्रेयसम्

## संस्कृत-पत्रम्

## २

निमित्तम्

जैनशासनज्योतिर्धर पू.आ.श्री

**विजय रामचन्द्रसूरीश्वराणां दीक्षाशताब्दी**


**प्रकाशनम् :**

**वैक्रमीय २०६९, आषाढकृष्णाचतुर्दशी**

**सोमवार, दि.५-७-२०१३**

**प्रतयः ७५० मूल्यम् : १००**

**प्रकाशनप्रतिष्ठानम् :**

**जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्**

ए-१, घनश्यामपार्क फ्लेट, १७, आनंदनगर सोसायटी,

त्रिशला फ्लेट के सामने, भठ्ठा, पालडी, अहमदाबाद

फोन : (ओ) २६६० ५८६४

# प्रकाशकस्य हृदयोद्गारः

नि:श्रेयसपदमेवात्यन्तिकैकान्तिक सुखस्थानमस्ति। संसारस्तु तद्विपरितः। तत्र तु क्षणिकदु:खविगमः सुखाभासो वा सुखरुपतया प्रतिभासमानत्वात्। जगज्जन्तवस्तु सदाकालं सुखं सुखेन च जिजीविषव इति स्वसंवेदनसिद्धमस्ति। सत्यामपि विविधसुखसामग्र्यां दु:खानुषङ्गित्व-मरणधर्मित्वे प्रतिजीवं दृश्येतैवेति नापुर्यत इच्छालेशमपि तेषापित्यपि स्वानुभववेद्यमस्ति विदुषां वराणाम्।

स्वजन्मतो पूर्वतृतीयभवे जीवराशिमुद्दिश्य भाविताऽप्रतिमभावाऽवाप्त-तीर्थंकर पदैः श्रीमज्जिनेश्वरदेवैस्तेनैव नि:श्रेयसपदाभिलाषूणां हितार्थे 'सम्यग्दर्शन-ज्ञान-चारित्राणि मोक्षमार्ग' इति प्रतिपादितम्। तदेव शरण्यमिति च दर्शितम्। श्रीगणधरदेवप्रमुख-भावाचार्यभगवद्भिस्तदेव भव्यानामुपदिष्टमुपदेष्टव्यं च। श्री महावीरजिनपट्टकुलाम्बर-भास्करायमाणैर्दयुगीन-**श्रीमदात्म-कमल-दान-प्रेमसूरीश**-विनेयावतंसाः परमगुरु श्रीमद्विजय **रामचन्द्रसूरीश्वराः** पूर्वयुगपुरुषक्षुण्णमार्गगतिका आसन्। आजीवनं वर्षाणामशितिपर्यन्तं शुद्धमार्गप्ररुपणापरतया तैस्तदेव प्रकाशितं। सारश्च 'संसारो सर्वथा हेय:संयम एवोपादेयः प्राप्तव्यश्च मोक्ष एवेति' प्रदस्तस्तैः। तेषामेव च दीक्षास्वीकारशताब्दी स्मृत्यर्थं 'नि:श्रेयस' पत्रं प्रारप्सितमस्माभिः आसित्।

पत्रस्य प्रथमाङ्कः पोषशुक्लत्रयोदश्यां पूज्यपादानां दीक्षाग्रहणदिने प्रकाशितः द्वितीयस्तु तेषां वयं भजामो। प्रथमप्रयासतयाऽनुभवाल्पत्वेन बुद्धिमान्द्याच्च नैका-क्षतयो पूर्वं सञ्जाता-भविष्यन्ति च तेन खिन्नत्वमस्माकं-संपादकानां च हर्षस्तु प्राप्तप्रथमाङ्कैः सूरि-मुनि-श्रेष्ठैः विद्वद्वर्यैश्चान्यैः प्रोत्साहिता-अभिनन्दिताः वयं, अपि च क्षतिक्षृण्णत्वं वत्सलभावेन दर्शितमनेकतमैर्विद्वद्भिः। 'शुभेयथाशक्तिः यतितव्यं' इत्यदिवचनेन परित्यक्तमूढभावैः द्वितीयांको प्रेष्यते। क्षतयो ज्ञापितव्या।

अभिप्रायोऽपि प्रेषितव्यः। एवमेव प्राप्तानुभवाः वयं संपूर्णशुद्धिं प्राप्स्यामहे।

-श्रीविजयहीरसूरीश्वरश्रुतज्ञानभवनम्
**मुख्यसञ्चालकः दिनेश जैनः**
**अहमदाबाद (गूर्जरदेशः)**

**सं.: २०६९ श्रावण (आषाढ) कृष्णा-१४**

# संपादकीयम्

ऐन्द्रवृन्दपरिपूजितं भगवद्वचनं परमोपास्यम्, परमाराध्यञ्च। हरति तदुपासना विघ्नौधम्, विदधते स्वात्मगुणस्फूर्त्तिं, करोति विषयकषायजन्य- वासनाप्रशमनम्। प्रवर्धयते नवनवोन्मेषशालीनीं प्रतिभां। वितरति स्वात्मस्वभावं, प्रगाढं प्रकुर्वते कुशलानुबन्धं कर्म, विरचयति स्वचित्तशोधनं, विकाशयते अध्यात्म-भावजागृतिं। क्लिष्टपापकर्मणाम् च विघटनं वितनोति।

ततः पुनः पुनः भगवद्वचनसंपर्कः सुतरां कर्तव्यः। स च संस्कृतभाषा-व्यासङ्गेन सुकरो भवति। यतः सम्यग्ज्ञान-दर्शन-चरणपरिभावितैः पूर्वर्षिभिः विरचिता नैकग्रन्थाः संस्कृतभाषायां विद्यन्ते, तेषाञ्च पठनं पाठनं मननं मंथनं निदिध्यासनञ्च चिदानन्दमाविष्करोति। ततस्ताषां अप्रकटकृतीनां प्रकटनञ्च तेषां ग्रन्थानामाधारं संप्राप्य गद्यपद्यलेखनं कुर्वतां विद्वज्जनानां लेखाः संगृह्य तषां प्रकाशनञ्च कृत्वा संस्कृतभाषा नवपल्लविता कर्तव्या, साम्प्रतम् तु सा लुप्तप्राया समजनि आङ्ग्लप्रमुखभाषाणां प्रवृद्धप्रचारंत्वात्। ततोऽस्माभिः भगवद्**वीर**पट्टावतंसक-मिथ्यात्वतमः दिनमणि-परमाराध्यपाद्-परमगुरुदेवाचार्यप्रवर विजय **रामचन्द्रसूरीश्वराणाम्** दीक्षाशताब्द्यवसरं संप्राप्य वात्सल्यवारिधि-पूज्यपाद्-पंन्यासप्रवर **श्रीवज्रसेनविजय-गणिवराणां** सत्प्रेरणापीयूषं पीत्वा प्रवचनदक्ष-पूज्यपादाचार्यप्रवर-**विजयहेमप्रभसूरीश्वराणां** सुविनीतविनेय-मुनि **जिनभद्रविजयेन** सह विचारविमर्शं कृत्वा समारब्धम् **'निःश्रेयसं'** नाम संस्कृतमुखा पत्रम्। यद्यपि नास्ति मम तादृशी मति क्षमता, नाऽपि च तादृशं सामर्थ्यं, तथाऽपि गच्छस्थविर प.पू.आ.श्रीमद्विजय-**ललितशेखरसूरीश्वराणां** सुविशालगच्छनायक प.पू.आ. श्रीमद्विजय-**पुन्यपालसूरीश्वराणां** चाज्ञां संप्राप्य तपागच्छधुरि-परमगुरुदेव श्रीमद्विजय-**रामचन्द्रसूरि** पट्टावतंसक-स्वाध्यायमूर्ति-श्रीमद्विजय **मुक्तिचन्द्रसूरीश्वर**-पट्टविभूषक प्रशमरसनीरनिधि-श्रीमद्विजय **जयकुंजरसूरीश्वर**-पट्टधररत्न प्रवचनप्रभावक-श्रीमद्विजय **मुक्तिप्रभसूरीश्वर**-पट्टालंकार-भवोदधितारक प्रसिद्धप्रवचनकार-गुरुदेव श्रीमद्विजय **श्रेयांसप्रभसूरीश्वराणां** कृपाऽमृतवर्षापरिप्लाविते मयि सारस्वतशक्तिः प्रकटयिष्यतीति स्वात्मप्रत्ययः। पंन्यासप्रवर पूज्यपादानां प्रेरणाङ्कुरेण 'निःश्रेयस' नाम वटविटपी पुष्पितः।

बहूपकृतं तैः शीघ्रकविवर प.पू.प्रशमरतिविजयैः पं.अमृत पटेलेन च तद् वटशाखिवर्धने-मार्गदर्शन प्रदानादिरुप जलसिंचन कार्यमऽपि कृतम्।

प्रथमाङ्के बहवः क्षतयः विद्वज्जनैः सौहार्द्रभावेन प्रदर्शिता। द्वितीयाङ्केऽपि मुद्रणादिदोषेन मन्मतिमान्द्येन च या याः क्षतयः भवेयुस्तास्ताः सोहार्द्रभावेन विद्वद्वरेण्या! ज्ञापयेरन् इत्यासाशे तेभ्योऽहं।

यथा चलनेच्छुः बाल चलति पतति च अपितु न शिक्षापात्रं भवति। यथा पङ्गु सहायकेन गहनाटवीमपि पारं गच्छति। तमसि दिपकः स्वाभीष्ट स्थान–वस्तु–दर्शनायालं भवति। नेत्रविहीनजनः चक्षुष्मत्साहाय्येन कण्टकाकीर्णं मार्गमपि वेगेनाऽतिक्रामते।

तद्वत् एतद् संपादनात्मके महत्यपि कार्ये भारे नितरामक्षमोऽहम् तथाऽपि गुरुकृपासुधानिस्यन्द–परिप्लुतोऽहं स्वलक्ष्यं साधयिष्यामि। इति कृत्वा द्वितीयाङ्के कृत–प्रयत्नातिशये शुद्धिकरण–सूचनादानादिभिः यैःबहूपकृतं ते **प्रशमरति विजय मुनिवराः** सदैव स्मरणियाः पगश्च प्रुफसंशोधनादिषु साध्वीवर्याश्री **क्षमानिधिश्रीणां** सुशिष्या साध्वीश्री **प्रशमनिधिश्री** सहिता सहाय्यं सततं कृतवती, मुद्रकश्री **आकांक्ष महोदयेन** बहुप्रयत्नो कृत स्तत्कथं विस्मार्यते! इत्थमनेकेषां प्रयत्नो अस्य साफल्ये वर्तते। यदि भोः। मतिमत्शेखरा! सज्जना! एतद् मत्कार्यं स्वनयनेभ्यः पावनीकृत्य निरीक्ष्य च महयम् क्षतिं प्रदर्शयिष्यत तदा भवज्ज्ञानप्रदिपेन ममाऽज्ञतातमःपटलं दूरीभविष्यति।

यद्यपि मुखपत्रे अर्वाचीना एव लेखा ग्रहितव्या, किन्तु अस्माभिः पूरैव द्वौ विषयौ निर्णीतौ, तथाहि–प्रथमं श्रीपूर्वाचार्यविहिताऽप्रकट–ग्रन्थानां प्रकाशनम्, द्वितीयं तु अर्वाचीन लेखाः।

पूर्व–महर्षिणां ज्ञानप्रतिभा चारित्रपरिप्लुता भवति तेन तेषामेकवाक्यमपि स्वात्मजागृतिं संपादयति। तेनैवाऽस्मिन्नङ्के एकम् अज्ञातकर्तृकमहर्षिसंकलित–वृत्तिसमेतं महामन्त्र–गर्भितंश्रीभक्तामरस्तोत्रं, द्वितीया तु भोजासागरपाठक वृत्तिसमेताश्रीरत्नाकरसूरीशैः कृता श्रीरत्नाकर–पञ्चविंशिकैवं द्वौ ग्रन्थौ प्राचिनौ प्रथमखंडे न्यस्तौ–(गृहितौ)। द्वितीय खंडे अर्वाचीन रचनायां तु पू.मुनिश्री रामविजय लिखिता श्रीशतकप्रकरणप्रस्तावना। पुनः संस्कृतभाषैव विश्वभाषापदवीमर्हति, भाषावैज्ञानिकमर्थज्ञानम्, काव्यहेतुः, संस्कृतभाषायां लेखनं न सुकरं, इत्यादयः संस्कृतभाषा दीनां महत्वसूचकाः विद्वज्जनानां गद्यलेखाः। तत्पश्चाच्च 'निःश्रेयसम्'–शब्द–रहस्यम्, श्री सिद्धस्तोत्रम्, श्रीदर्भावतिपार्श्वनाथ स्तोत्रम्, श्रीशारदास्तोत्रद्वयम्, चारित्रसप्तविंशिका, निर्वेदद्वात्रिंशिका, परिनिर्वाणम्, सिद्धाचलस्तवनाप्रमुखलेखाः गृहिता सन्ति।

समीहेऽहं तत्र–भवतां प्रज्ञावतां सूचनांदयः क्षति–प्रदर्शनञ्च प्रान्ते पुनश्च भोः! प्रतिभाशालिन! विद्वान्सः! निःश्रेयसे मुखपत्रे भवत्–प्रतिभा–रसाऽमृतमयाः लेखाः प्रेषयित्वा प्रमोदयन्तां वाचकगणामिति प्रार्थये सौहार्दभावाऽर्द्रोऽहम्।

।। इति शुभं भूयात् ।।

**सद्गुरुचरणसेवाहेवाकः**

**श्रीसम्यग्दर्शनविजयो मुनिः।**

# आभारम्....अनुग्रहम्....अनुमोदनम्....

प्रसिद्धप्रवचनकार-

पूज्यपादाचार्यप्रवर-

श्रीमद्विजय-श्रेयांसप्रभसूरीश्वराणा-

मुपकारस्मृत्यर्थम् एकेन गुरुभक्तपरिवारेण

अस्मिन् ग्रन्थे द्रव्यव्ययेन सुकृतसञ्चयः कृतः

तस्य सुकृतानुमोदनं करोति...

जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्-मुख्य

संचालनगणः

अहमदाबादः

# क्रमनिर्देशः


| विषयः | लेखकादयः | पृष्ठः |
|---|---|---|
| * ''निःश्रेयसम्'' इत्यस्य शब्दस्य रहस्यम् | पू.आ.श्री विजयश्रेयांसप्रभ सूरीश्वराः | ८ |
| * परिनिर्वाणम् | मुनिश्री मोक्षरतिविजयः | ९ |
| * निःश्रेयसपत्रार्थं शुभेच्छादिपत्राणि | | १० |
| **खण्ड-१ प्राचीन कृतयः** | | |
| * श्री रत्नाकरपञ्चविंशतिका (सवृत्ति) | सं.प.अमृत पटेलः | १७ |
| * अज्ञातकर्तृकवृत्तिसमेतम्-भक्तामरस्तोत्रम् | सं.साध्वीश्री क्षमानिधिश्री | २७ |
| **खण्ड-२ अर्वाचीन कृतयः** | | |
| * श्रीशतकप्रकरणप्रस्तावना | तपागच्छेश पू.आ.श्री विजयरामचन्द्रसूरीश्वराः | ५१ |
| * यशोयोगभेदद्वात्रिंशिकासारः | देवर्धिः | ५८ |
| * संस्कृतभाषैव विश्वभाषापदवीमर्हति | कविराजो द्विजेन्द्रनाथः शास्त्री | ६२ |
| * काव्यहेतुः | आचार्यः शिवदत्तः द्विवेदी | ६४ |
| * भाषावैज्ञानिकमर्थविज्ञानम् | आचार्यः शिवदत्तः त्रिवेदी | ६८ |
| * संस्कृतभाषायां लेखनं न सुकरम् | देवर्धिः | ७२ |
| * सिद्धाचलस्तवनम् | मुनिश्री मोक्षरतिविजयाः | ७५ |
| * दर्भावतीतीर्थाधिनाथश्रीलोढणपार्श्वजिनस्तुष्यष्टकम् | पू.आ.श्रीविजयराजरत्नसूरीश्वराः | ७६ |
| * श्री सिद्धमन्त्रस्तोत्रम् | साध्वीश्री प्रशमनिधिश्री | ७७ |
| * श्री सारस्वत स्तवना | श्रीदर्शनः | ८२ |
| * श्री वाग्देवी स्तुत्यष्टकम् | मुनिश्री दर्शनरक्षित विजयाः | ८३ |
| * श्री चारित्र सप्तविंशिका | मुनिश्री सम्यग्दर्शन विजयाः | ८४ |
| * निर्वेद द्वात्रिंशिका | मुनिश्री प्रशमरक्षित विजयाः | ८९ |

# "नि:श्रेयसम्" इत्यस्य शब्दस्य रहस्यम्

**-आ.श्री विजय श्रेयांसप्रभ सूरीश्वरा:**

नि:शेषतया श्रेय:-कल्याणं स्वात्मस्वरुपलाभरुपं परपुद्गलसङ्गनिर्मुक्तं यत्र तन्नि:श्रेयसं-पदं प्रोच्यते। तन्नितान्तसुखात्मस्वभावं समूलदु:खविनाशरुपमिति ज्ञानिभि र्प्रोक्तम्। 'पुण्य-पापक्षयान्मुक्ति:' इत्यादि-वचनैस्तत्स्वरुपं प्रतिपाद्यते।

वस्तुत: विश्वेऽस्मिन्विश्वे जीवानामानन्त्यमस्ति, न तेषां समूलं विनाश: न च प्रथमतया समुत्पत्ति:। चतुरशितिलक्षयोनिषु पुनरपि जननं, पुनरपि मरणं कुर्वतां तेषां देहपरावर्तनं भवत्यात्मद्रव्यं तु तदेव स्थिरतयाऽवतिष्ठते, अवस्थान्तरभवनं तेषां पर्याय-इति कथ्यते। एते जीवादिभावा: न कै: समुत्पादिता न च तेषां कोपि विनाशक:। तेनैव जिनशासने जीवादिभावानामनादिमत्वमावेदितं, जीवानां संसारोऽपि नादिमान्, सोऽपि कर्मसंयोगस्य अनादित्वेन निर्मितोऽस्ति। एकेन्द्रियादि-एकभवतोऽपरस्मिन्भवे गन्तृणां शुभाशुभादि-भावाद्भावान्तरं प्राप्नुवतां दु:खानुभूतिरेव वरिवर्तते, या काचनाऽपि सुखासिका मन्यते सा मोहवशात् काचित्दु:खा-भावरुपा काचिच्च सुखप्रतिभासरुपाऽस्ति।

जन्म-जीवन-मरणानि अपि न स्वैच्छिकानि, अपितु कर्मबन्धनपरतन्त्राणि। पारतन्त्र्यं तु महादु:ख-रुपमिति तु को न जानाति-मन्यते वा? कर्मबन्धनमुक्तात्मनां नि:श्रेयस गमनं भवति, तेषां परिपूर्णं शाश्वतं स्वतन्त्रं च सुखमस्ति, तत्सहजात्मस्वभावमिति श्रेष्ठसुखमस्ति। इति पूर्णज्ञानिभि दृष्टं भव्येभ्यश्च सदुपदेशदानेन प्ररुपितं। ततो तदेवाभिलषन्तो वस्तुत: विद्वांस:, विरलविभूतय: वन्दनीया: स्तवनीयाश्च सन्ति। ते तत्पदमेव लक्षीकृत्य जीवन्ति परेषामपि तदर्थं प्रोत्साहयन्ति, पुद्गलभावात्मक-विषय-कषायजन्यसुखेषु तेषां सुखबुद्धिं निवारयन्ति। एवं विधोपदेशदानमेव महोपकारकरणमुच्यते, तदेव च कुर्वन्तस्ते स्वजन्म-जीवन साफल्यं मन्यन्ते।

धर्मशास्त्ररहस्यवेदिषु स्वात्मनोऽन्तर्भावं मन्यमाना द्रव्यदयाऽपेक्षया भावदयामेव उररीकुर्वन्ति। श्रीजिनशासनभासनभास्करतुल्या: भावाचार्यभगवन्त: सूरिपुरंदरा एवंविधपरंपरयैदंयुगीनकालमप्यलंकुर्वाणा: श्रूयन्ते-दृश्यन्ते च। तेषु षण्णवतिमितायुषि वर्षाणामशितिं यावत् 'आत्मनि रमते इति राम: इत्यादिव्युत्पत्या स्वनाम सार्थक्यं कुर्वद्भि: 'श्रीमद् विजय रामचन्द्रसूरीश्वरै:' पूर्वमहर्षिणामद्यकालेऽपि स्मरणं कारितं यावज्जीवनं च सुखमयोऽपि संसारस्त्याज्य: संयम एवादरणीय: नि:श्रेयसपद एव गन्तव्यमिति प्रतिपादनपरै: जन्म जीवनं च सफलीकृतं, तेषां दीक्षा-स्वीकार-शताब्दी-स्मृत्यर्थं अस्या: पत्रिकाया: 'नि:श्रेयसम्' इत्यभिधानं कृतं येन सततं तत्पाठकानां तदेव स्मृति गोचरतामावहति।

# परिनिर्वाणम्

(मन्दाक्रान्ता)

**-मुनिश्री मोक्षरतिविजया:**

दिव्यालोकं, दिशि विदिशि वि-स्तारयन् सूरिदेव:,
शिष्योत्तंसै:, परिवृततनु:, प्रावृषं वीक्ष्य पार्श्वे ।
वस्तुं तीरे, व्यचरदुषितां, साभ्रमत्या: स साभ्र,-
मत्याह्वानां, दिवमिव पुरीं, देवसेव्याङ्घ्रिपद्म: ।।१।।

तां पूर्वर्यां प्रति विहरत: सूरिसम्राज एषा,
सिन्धुर्मन्दं मधुरमधुरं स्वागतं व्याजहार ।
नीरालम्बिभ्रमणनिपुणश्वेतपक्षस्वनैश्च[1],
तीरालिङ्गिद्रुमततिलसत्कोकिलाकूजितैश्च ।।२।।

हर्षोद्रेकादभिमुखमिव श्रीगुरोर्गन्तुमुत्का,
छायां काश्चिद् रचयति चिरोत्कण्ठिताया: प्रियाया: ।
फुल्लोत्फुल्लै: कमलनयनै: शिञ्जितैर्वीचिनादै-
हंसीशब्दै: सरसरसनाकिङ्किणीरम्यरावै: ।।३।।

मध्येदेहं नहि धृतजिन:[2] किन्तु साक्षाज्जिनेश:[3],
सत्यां तथ्याममृतपदवीं[4] दिव्यलभ्यां[5] ददान:।
गाम्भीर्यात्मा महिमभवनं निर्मलश्रीसनाथ:,
सान्निध्यं मे नवमणिनिधि: स्वीकरोति स्वतोऽयम् ।।४।।

ध्यायन्तीति स्वगतमभवत् स्तब्धनीरेव सूरिं,
निध्यायन्ती परमरमणं विस्मृताशेषविश्वा ।
स्वस्वायान्तं स्वयमभिमुखं नाथमभ्यर्थ्यमानाऽऽ-
कण्ठाश्लेषं विलसति सरित् सा तरङ्गोर्ध्वबाहु: ।।युग्मम्।।५।।

१. श्वेतपक्षा: - सितच्छदा:-हंसा: २. जिनो विष्णुरपि ३. बहुव्रीहिसमास: ४. मोक्षमार्ग: ५. दिवि-स्वर्गे अलभ्याम्

# निःश्रेयसपत्रार्थं शुभेच्छादिपत्राणि

**अनेक सूरिवर-मुनिवराणां विदुषां च पत्र प्रकाशनपूर्वे-प्रथमाङ्कप्रकाशनान्तरं व संस्कृत-गुर्जर आङ्ग्ल-भाषायां समागत शुभेच्छा-सूचनाऽभिप्रायात्मकानि बहुनि पत्राणि सन्ति, केषांचित्पत्राणामंशाः अत्र प्रकाश्यन्ते।।**

---

**धर्मभावनाशील - जगद्गुरु श्री विजयहीरसूरीश्वर श्रुतज्ञान भवन सञ्चालकगण!**

सादरं धर्मलाभोऽस्तु।

युष्मदीयसंस्थया निःश्रेयसनामकं षाण्मासिकं संस्कृतपत्रं प्रारब्धमिति वृत्तमाशीःकृते च प्रार्थना ज्ञाता युष्मदीयपत्रेन। चित्ते भृशमनुमोदना सञ्जाता।

इदं निःश्रेयसपत्रं पूजनीयश्रमण-श्रमणीवर्गेषु संस्कृतरसिकजेनषु च संस्कृतपठनपाठनलेखनादि-प्रचारे निमित्तीभूयात् परम्परया च निःश्रेयसपदं प्रति तेषां प्रगतिं कारयित्वा स्वनामसार्थक्यं कुर्यादिति कामयामहे वयम्।

एकमात्मीयं सूचनं यद् मुद्रणादिक्षतयो बह्व्यो दृष्टास्ता निवारणीया आगामि प्रकाशने।

फाल्गुनशुक्ला त्रयोदशी, वैक्रमीयं २०६९ तमम‍ब्दम्। चेम्बुरतीर्थम्।

**-आचार्य विजय सूर्योदयसूरिः**

**- आचार्य विजय राजरत्नसूरिः**

---

**आधोई**

निःश्रेयसम् संस्कृत - पत्रम् - १ प्राप्तम्।

अद्यत्वे संस्कृतं प्रत्यहं क्षीणतां गच्छेद् दृश्यते।

एतादृशेषु पत्रेषु प्रकाशितेषु संस्कृताध्ययनं पुनः विजृम्भितं भविष्यति।

साधु-साध्व्योऽपि अधिक संस्कृताध्ययने दत्तावधानाः भविष्यन्ति।

श्री जैन सङ्घे संस्कृत पत्राणां विशेषतः प्रचारो न दृश्यते।

यानि अपि प्रकाशितानि भवन्ति तानि अपि कृच्छ्रादेव चलन्ति।

शनैः शनैः तानि उपरतानि भवन्ति।

एतस्य पत्रस्य एषा गति र्मा भवतु इति वयम् आशास्महे। एतत्प्रकाशनरताः विद्वांसः महात्मानः सन्ति अतः एषा गति र्नैव भविष्यति इति वयं विश्वसिमः -सरलेन संस्कृतेन लिख्यमानाः गद्यलेखाः अधिकाः भवन्तु। यतः प्राथमिकविद्यार्थिनः अनेन एव व्यवहारेण आकृष्टाः भविष्यन्ति। अन्यथा दुर्गमं पद्यं विज्ञाय दूरतः एव परिहरिष्यन्ति। यथा - गुजरातीमासिकेषु कथादिलेखाः प्रकाशिता भवन्ति तथा अत्राऽपि भवन्तु। अन्यथा इदं पत्रं पुस्तकरूपेण एव पाठकाः भावयिष्यन्ति। पत्रे पुस्तके च कः प्रतिविशेषः? यत्र समकालिकवार्तादिकं स्यात् विचारप्रेरकाः वा लेखाः स्युः तत् पत्रम्। इदं पत्रं पुस्तकरुपं मा बिभर्तु इति वयं बूमः। साफल्यं गच्छतु भावत्कः श्रमः इति काम्यते।

**मुक्ति - मुनी**

**(पू.आ.श्री कलापूर्ण सू.महाराजा समुदायवर्ती)**

**प्रियात्मन्श्री,**

**सूसम्पादितसुन्दरसंस्कृतपत्रहेतु अभिनंदनम्।**

१. जैन साहित्ये प्राचीनेतिहास-संवत संस्थापक विक्रमादित्य:

२. जैन साहित्ये प्राचीनेतिहास-शालिवाहन-सातवाहन

३. गौतम बुद्ध-स्वामी महावीर सम्वाद: इति विषयेषु शोध-लेख प्रकाशनम् कुर्वन्तु कृपया ।

चतुर्दश तीर्थंकरेषु, बोधिसत्वेषु, अवतारेषु उभयनिष्ठा: सन्ति आदिनाथ: बुद्ध:, राम:, कृष्ण:, नारदश्च। ऐकेश्वर-प्रतिपादितम् सर्वत्र। ॐ परिवारे सनातने जैन, बौद्ध, क्रिस्त, आर्यसमाजादि सम्प्रदाया: सम्मानिता: सन्ति। यस्मिन् विषये समन्वय:, तस्मिन् विषये शक्ति समन्वय: करणीय: प्रोत्साहनेन धर्मस्थलम् मानव सेवा केन्द्रम् करणीयं।

**निवेदक: डॉ. कृष्ण नारायण पाण्डेय भारद्वाज**

**सम्पादक : प्रभातम् संस्कृत पत्रम्, दैनिकम् ई-१०५२ राजाजीपुरम्, लखनऊ-३५**

**फोन : २२६०१७ मो.: ९६५११ ७९१४६**

---

**मान्या:**

सादरं वन्दनानि। 'नि:श्रेयसम्' प्राप्तम्। तत: महान् सन्तोष: अनुभूत:। अन्यस्या: पत्रिकाया: ऊदय: महते सन्तोषाय एव। अस्या: परिचय: सन्भाषणसन्देशे एप्रिलमासीये अङ्के करिष्यते।

(मार्चमासीय: अङ्क: एतावता मुद्रित: सर्वेभ्य: प्रेषित: च ।)

**इति भवदीय, जनार्दन हेगडे (सम्पादक:)**

---

**સુવિશાલ ગચ્છાધિપતિ પ.પૂ. આચાર્ય શ્રીમદ્ વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

સંચાલક દિનેશભાઇ જોગ ધર્મલાભ

અનુમોદના નિઃશ્રેયસમ્ સંસકૃત પત્ર-૧ મળ્યું સારો પ્રયાસ કર્યો છે. અર્વાચિન કૃતિઓમાં શાસ્ત્ર વિરુધ્ધ વાતો ન આવે તેની ખૂબ કાળજી રાખવી જરુરી છે. નહિંતર ભવિષ્યમાં વાદ-વિવાદો માંથી જૈન સંઘ બહાર નહિં આવે.

---

સંસ્કૃત પત્રમ્ પહેલો અંક મળેલ છે. વાંચ્યો ઘણોજ સુંદર છે.

**- ગચ્છાધિપતિ પ.પૂ. આચાર્ય દેવશ્રી અશોકરત્ન સૂરીશ્વરજી મ.સા.**

---

**વાપી,** તા. 03/03/13

દેવગુરુ ભકિતકારક તંત્રી મહોદય શ્રી જી, આદિ સર્વેયને મારા ધર્મલાભ ! 'નિઃશ્રેયસમ્ સંસ્કૃતમ્' નો પ્રથમ અંક તમોએ મોકલાવ્યો તે મળેલ છે. તે અંગે વિશેષ વિગતથી જે કંઇ જણાવવાનું છે તે પછી જણાવીશ, હાલ તો આપ સૌએ સહકાર સાધીને સંસ્કૃત માં સામાયિક ચાલુ કર્યુ તે બદલ ખૂબ ખૂબ ધન્યવાદ. દીર્ઘદષ્ટિ રાખીને વાર્ષિક બેજ અંક બહાર પાડવાનુ આયોજન પણ મને આનંદદાયક લાગ્યું છે.

લી. રત્નભૂષણસૂરિ

---

**વિજયશીલચંદ્રસૂરિ,**

સંચાલક શ્રી, (નિઃશ્રેયસમ્)

પૂ.પં. શ્રી વજ્રસેન વિજયજી મ.સા.ની સૂચનાથી આપે મોકલાવેલ નિઃશ્રેયસમ્ - સંસ્કૃત પત્રિકાનો પ્રથમ અંક મળ્યો છે. તે બદલ ખૂબ ખૂબ ધન્યવાદ... સંસ્કૃત સાહિત્યના સંપાદન તથા નૂતન સર્જનનો આ પ્રયાસ અત્યંત સ્તુત્ય અને આવકારદાયક છે. અનુમોદના તથા આનંદ ...ભવિષ્યમાં પ્રકાશિત થતા બીજા અંકો સાથે જણાવેલ સરનામે મોકલવા કરશો..

-કીર્તિત્રયી

દેવગુરુભક્તિકારક - સુશ્રાવક - દિનેશભાઇ જૈન (સંચાલક - નિઃશ્રેયસમ્ સંસ્કૃત પત્ર) યોગ્ય ધર્મલાભ

નિઃશ્રેયસમ્‌નો પ્રથમ અંક પણ મળ્યો છે. વિહારાદિમાં અનુકુળતા મળેથી જોવાની ભાવના છે.

લિ. વિજય કીર્તિયશસૂરિના ધર્મલાભ

---

દેવલાલી મહા વદ ૧૧, ૨૦૬૯

પ્રતિ,

મુનિ સમ્યગ્દર્શન વિજયજી મહારાજ

વંદના સુખશાતા,

આપનો પત્ર મળ્યો વાંચી ખૂબ આનંદ થયો. લૂપ્ત થતી સરસ્વતી નદીને દેવભાષા સંસ્કૃત રૂપી પ્રવાહને 'નિઃશ્રેયસમ્' દ્વારા વહેતો કરતો જોઇ ખુબ કીર્તનીય લાગ્યું એ પ્રવાહમાં અમે પણ તે જ્ઞાનનો લાભ લઇ જ્ઞાનાનંદ માં અભિવૃદ્ધિ કરીએ એ હેતુથી નીચેના કાયમી એડ્રેસ પર મોકલાવશોજી.

મુનિ મલયગિરિ વિજય.

મુનિ ભાગ્યહંસ વિજય

---

મહાવદ - ૧, મંગળવાર,

ધર્મતીર્થરક્ષક પૂ.આ.શ્રીમદ્

વિજય યુગભૂષણસૂરીશ્વરજી મ.સા.

આપના તરફથી ષટ્માસિક નિઃશ્રેયસમ્ પરિપત્રની કોપી મળી, આપનો પ્રયાસ સારો છે. વર્તમાન સંઘમાં શાસ્ત્રો અને સંસ્કૃત સાહિત્ય પ્રત્યે રૂચિ ઘટી રહી છે, તે અવસરે આ પરિપત્ર પુનઃ શાસ્ત્ર ના મનન-ચિંતનમાં રૂચિ ધરાવનારો બની રહે તેવી શુભ મંગલ કામના.

અમને પણ આ પરિપત્ર આપે મોકલેલ ગીતાર્થ ગંગાના એડ્રેસ પર મોકલતા રહેશો.

-ગુર્વાજ્ઞાથી-ગુર્વાજ્ઞાધીન કલ્પજિત વિ. ગણિ

---

ધર્મ પ્રેમી દિનેશભાઇ યોગ્ય ધર્મલાભ

નિઃશ્રેયસમ્ નું સુંદર નજરાણું ગઇકાલે મળ્યું છે. શાંતિથી હવે જોઇશ.

લી.રત્નસુંદસૂરિના ધર્મલાભ...

---

શ્રી પાર્શ્વવલ્લભ તીર્થ

મુનિ યશોવિજય,

નિઃ શ્રેયસમ્ સંસ્કૃતપત્ર - ૧ મળ્યું જોઇ આનંદ થયો સંસ્કૃત ભાષાને ઉજ્જીવિત કરવાના પ્રયાસમાં આ સુંદર ભાત પાડશે. સાંપ્રદાયિકતાથી પર રહી આનું સતત થતું પ્રકાશન રૂડી પેરે થતું સંપાદન જિનશાસનમાં તથા સંસ્કૃતપ્રેમીઓમાં તેને આદેય બનાવી શકશે તેવી શ્રદ્ધા છે. સંપાદક મુનિ યુગલની મહેનત ખૂબજ સુંદર છે. અર્વાચીન કૃતિઓ પણ સરસ છે. નૂતન સંસ્કૃત પત્ર પ્રત્યે શુભકામનાઓ

-મુનિ યશોવિજય

**વાત્સલ્યમૂર્તિ પ.પૂ. વજ્રસેન વિજયજી મ.સા.,**
**સ્નેહમૂર્તિ આ.શ્રી હેમપ્રભસૂરિજી,**
સર્વ મુનિમંડલ વંદના... અનુવંદના... શાતાપૃચ્છા....

'નિઃશ્રેયસમ્' ની યોજના જાણી આનંદ થયો. મને લાગે છે કે આ વિચાર જિનભદ્રાદિનો જ હશે. તમે વડીલોએ આ વિચાર વધાવી લીધો અને મુનિમંડળીએ સાહસ આદર્યું છે એ મજાની વાત છે.

**-ઉપા. ભુવનચંદ્ર વિજય**

**બનારસ - દેવર્ધિપરિષદ**

વિદ્વાન્ - વિદ્યાપ્રેમી મુનિવરશ્રી સમ્યગ્દર્શન વિજયજી યોગ અનંત અનુવંદન શાતામાં હશો?

સંસ્કૃત મુખપત્ર અંગે આમંત્રણ મળ્યું તમે આ સરસ શરૂઆત કરાવી રહ્યા છો, અનુમોદના અને આનંદ

**-મુનિ પ્રશમરતિ વિજય**

**વિદ્વદ્વર્ય મુનિરાજશ્રી સમ્યગ્દર્શન વિજયજી આદિ,**

અનુવંદના સાથે,

નિઃશ્રેયસમ્ સંસ્કૃત પત્રમ્ બુક મળેલ છે. આપશ્રીએ કરેલ સ્તુત્ય પુસ્ષાર્થ અનુમોદનીય છે.

પ્રાચીન-અર્વાચીન કૃતિઓનો સયોગ આનંદિત કરે તેવો છે. ચારિત્ર સપ્તવિંશિકા અદ્ભૂત કૃતિ છે. આપશ્રીનો પુરુષાર્થ સત્તત વૃદ્ધિ પામે એજ અભ્યર્થના.

**લી...પુંડરીક વિજયના અનુવંદના...**

**સિદ્ધગિરિજી** **મહાવદ-૫**

**વિદ્વદ્વર્ય મુનિવર્ય શ્રી સમ્યગ્દર્શનવિજયજી યોગ્ય અનુવંદના - સુખશાતા.**

નિઃશ્રેયસ્ માટે સ્વયંભૂરમણ જેવડી શુભેચ્છાઓ ... ! પ્રતિભાવો અપ્રતિમ છે.. એમ લાગે છે કે - આ પ્રથમાંક પ્રકાશનપૂર્વે સમય ઓછો મળ્યો છે, એટલે શુદ્ધિકરણ બરાબર નથી થઇ શક્યું... ક્યાંક ક્યાંક છંદોભંગ, ભાષાકીય અશુદ્ધિઓ પણ દેખાય છે. સરેરાશ, ઉંચી અપેક્ષાઓ જગાડી છે નિઃશ્રેયસ્ એ.

**-મોક્ષરતિવિજય**
**તત્ત્વદર્શનવિજય**

**વ્યવસ્થાપકશ્રી સ્મૃતિમંદિર પ્રકાશન**

અમદાવાદ,

સાદર પ્રણામ,

આપણા તરફથી 'નિઃશ્રેયસમ્' શાસ્ત્ર ગ્રંથો વિ. સંશોધન સંપાદનનો પ્રથમ અંક મળ્યો ખરેખર પૂજ્ય ગુરુભગવંતોને ખૂબજ પરિશ્રમ કરીને ત્રિમાસિકનું પ્રકાશન કર્યુ છે. ઘણી બધી અપ્રકટ કૃતિઓ અને નૂતન કવિતા સર્જનનું સૌપ્રથમ વાર પ્રકાશન થયું છે. આ રીતે પૂર્વાચાર્યો અને વિદ્વાનોએ કરેલ પરિશ્રમ અને જ્ઞાનસાધનાની તેઓની કૃતિ જગત સમક્ષ મુકવાનું ઉત્તમ કાર્ય થયુ છે તેની હાર્દિક અનુમોદના કરીએ છીએ.

**લી. બાબુલાલ સરેમલ**
**અમદાવાદ**

www.vallabhacharyakrupa.org
Bala krishna champu with Monjari commentary
(532 Pages - sanskrit)
To shri Bwaharim Bhaje
(vividho stotra - sanskrit)
for the benefit of teachers and students.
Feathered friends from Vraj
(An unique survry of Bird species found in Vraj)
Vraj Darshan
Gowardhanesh Prakashan Mandal Mumbai

---

To,
**Jagadguru P. A. Shree Vijay**
**Hirsurishwarji Shruta Gyan Bhavanam**
A - 1, Ghanshyam Park, Flat - 17, Anand Nagar,
Near Trishala Flat, Bhatta, Paldi - Ahmedabad.

Sir / Madam,

I acknowledge with thanks the receipt of your letter on 19th February, 2013, along with a copy of **" Nihsreyasam" - Sanskrit Patram 1**. This will be enlisted in the ensuring volume of " Pracl-Jyoti : Digest of Indological Studies, i.e. Vol. XL III - XL IV (2007-08). The summaries of article included in your jorunal shall also published accordingly in some ensuring issue of " Pracl - Jyoti "

Thanking you,

Yours Faithfully
**(Ranvir Singh)**
Editor

**Go. Gokulnatha**
**Mumbai**

---

Sir,

I Come to know about the Sanskrit Magazine નિઃ શ્રેયસમ્ Kindly send me a copy. Pl. write to me (by email or sms to my mobile) about the amount to be send for subscription. Here we have many eager students learning સંસ્કૃત . ધન્યવાદઃ નમસ્કાર

**Dr. A.M. Satyanarayana**
**Chennai-36**

# निःश्रेयसम्

संस्कृत-पत्रम्

## खण्ड-१

## प्राचीन कृतयः

भोजासागरपाठक वत्ति समेता रत्नाकरसूरिसंदृब्धा

# श्री रत्नाकरपञ्चविंशतिका

## (रत्नाकरसूरिसंदृब्धम्)

**-सं.पं.अमृत पटेल:**

निःश्रेयसम्-२मां प्रकाशित थइ रहेल भोजासागरपाठक वृत्तियुता रत्नाकरपञ्चविंशतिका सर्वप्रथम सवृत्ति प्रकाशित थइ रही छे, जे शाके **सं.वेद अङ्क-अद्रि-क्षमा** एटले के ११८४ नी सालमां लखायेल प्रत कोबा-७७७/पृ.११मांथी प्राप्त थयेल छे. छाणिवासी दयाशंकरे लखी छे. जेमां परमात्म स्तवना अने दुष्कृत मर्हा समायेली छे. प्रशस्ति श्लोक पादांश अस्पष्ट छे।

नमस्कृत्य जिनं सार्व-मादिदेवं पुरातनं, वक्ष्ये सङ्क्षेपत: श्रेय: स्तोत्रस्य सुखबोधिकाम् ।।१।।
तत्राऽऽदौ निजवाञ्छितसिद्ध्यर्थं मङ्गलाचरणपूर्वकं श्री सिद्धाचलमण्डन
श्री युगादिजिनं श्री रत्नाकरसूरिराशीर्वर्चनेन - स्तौति -

**श्रेयः श्रियां मङ्गलकेलिसद्म, नरेन्द्र देवेन्द्रनताङ्घ्रिपद्म! ।**
**सर्वज्ञ सर्वातिशय प्रधान! चिरं जय ज्ञानकलानिधान! ।।१।।**

**अन्वय:** (१) हे श्रेय श्रि० (२) हे नरेन्द्र० (३) हे सर्वज्ञ० (४) हे सर्वातिशय० (५) हे ज्ञान!०
त्वं चिरं जय चिरं काल सर्वोत्कृष्टेन (सर्वोत्कर्षेण) प्रवर्त्तस्व।
इति संटङ्क: (त्वं कथंभूत!) १

श्रेयांसि मङ्गलानि, द्रव्यभावतो द्विविधानि, तत्र द्रव्यमङ्गलानि दधि-दूर्वादीनि, भावमङ्गलानि-पञ्चपरमेष्ठिस्मरणादीनि, तेषां श्रेयसां, श्रियो लक्ष्म्य:, तथा (अथवा) **श्रेयांसि** च **श्रियश्च**, तासां **मङ्गलार्थं केलय:** क्रीडितानि, तेषां **सद्म** गृहं तस्य सम्बोधने श्रेय: श्रियां मङ्गलकेलिसद्म-कल्याण लक्ष्मीनां माङ्ल्यक्रीडानिवास! पुन: (२) **नरेन्द्रा** राजानो **देवेन्द्रा:** शक्रा: तै: **नतौ** नमस्कृतौ अङ्घ्री एव पद्मौ यस्य स:तस्य संबोधने हे नरेन्द्र देवेन्द्रनताङ्घ्रिपद्म!। पुन (३) सर्वं जानाति इति सर्वज्ञ: समस्तवस्तुवेदी तस्य संबोधनं हे सर्वज्ञ!। पुन: (४) हे सर्वातिशयप्रधान!- सर्वे च ते अतिशयाश्च ते सर्वातिशया: तै: प्रधान: प्रकृष्ट:, तस्य संबोधने हे सर्वातिशयप्रधान! चतुस्त्रिंशदतिशयवरिष्ठ!। पुन: (५) हे ज्ञानकलानिधान! ज्ञानं केवलज्ञानं, तस्य कला चतुर्दशरज्जुप्रमाणलोकोदरवर्त्तिसूक्ष्म-स्थूलवस्तु कदम्बकस्य अलोकस्य च प्रकाशिका, तस्या: निधानं निधिरनवधिकत्वात्, तस्य संबोधनं - हे ज्ञानकलानिधान! त्वं जय, जयवान् भव ।।१।।

**जगत्त्रयाधार! कृपावतार!, दुर्वार! संसार विकारवैद्य!।**
**श्री वीतराग! त्वयि मुग्धभावाद्, विज्ञ! प्रभो विज्ञपयामि किञ्चित् ।।२।।**

**हे जगत्त्रयाधार!** इति जगतां लोकानां त्रयं-जगत्त्रयं, तस्य **आधार:** अवष्टम्भरूप:, तस्य संबोधने-हे जगत्त्रयाधार! पुन: **हे कृपावतार!**-कृपा करुणा, तस्या अवतार:, तदर्थधृतशरीर:, तस्य संबोधने हे कृपावतार! करुणास्पद! पुन: **हे दुर्वारसंसारविकारवैद्य!** -दु:खेन वार्यते इति दुर्वार:, संसरन्ति प्राणिन: अस्मिन्निति संसार:, दुर्वारश्चासौ संसारश्च - दुर्वारसंसार:, तस्य विकार: विक्रिया, अनेकधा सदु:ख (खं)-

भ्रमणं तस्य वैद्यस्तत्प्रतिक्रियाकुशलः सर्वदुःखोच्छेदकत्वात्। पुनः **श्री वीतराग**!-वीतो गतो रागः द्वेषौ[१] यस्मात् स वीतरागः श्रिया युक्तो वीतरागः श्रीवीतरागः, तत्संबोधने श्रीवीतराग! हे विज्ञ!, विशेषेण जानाति इति विज्ञः, तत्संबोधने हे **विज्ञ**!। पुनः **हे प्रभो**! प्रभवति इति प्रभुत्वं करोति इति प्रभुः तत्संबोधने हे प्रभो! **त्वयि** विषये **मुग्धभावात्** बालस्वभावात्, **किञ्चित्** स्तोकमात्रं न च सर्वं विज्ञा(ज्ञ)पयामि विज्ञप्तिविषयीकरोमि इत्यर्थः। विज्ञस्याग्रे विज्ञपनं सुधायाः धवलीकरणं, अतो निरर्थकं, तथापि निजमनोभिलाषपूर्त्यर्थम् किञ्चिद् देशतः कथयामीति भावः ।।२।।

**किं बाललीला कलितो न बालः, पित्रोः पुरो जल्पति निर्विकल्पम्।**
**तथा यथार्थं कथयामि नाथ!, निजाशयं सानुशयस्तवाग्रे ।।३।।**

**हे नाथ**! नाथते ऐश्वर्यं करोति इति नाथः, तत्संबोधने हे नाथ!

बालस्याऽव्यक्तस्य लीला बाललीला, तया कलितो विहितो बाललीलाकलितः, एतादृशो बालो मन्दो यथाजातः शिशुर्वा। माता[२] च पिता च पितरौ, तयोः पित्रोः, पुरोऽग्रतः। बालः कीदृशः! **निर्विकल्पः** विकल्पाः विबुधगम्याः निर्गतो विकल्पेभ्य इति निर्विकल्पः, कल्पनारहितो विशेषविचार विकल्पः (विकलः) तादृशो बालः। अथवा निर्विकल्पं निर्विचारं यथा स्यात् तथा इति क्रियाविशेषणम्। **किं न जल्पति**? अपि तु जल्पति एव। **तथा** तेनैव प्रकारेण, **अहं तवाग्रे सानुशयः** सह अनुशयेन पश्चात्तापेन वर्तमानः सानुशयः सन् निजं स्वकीयआशयोऽभिप्रायः तं **निजाशयं** स्वकीयचित्तम्। **यथार्थं** यथा अर्थः प्रयोजनं यस्य स यथार्थः तं यथार्थं तथ्यं कथयामि प्रकाशयामि - यथा मम मनस्ति (मनोऽस्ति। मनस्यस्ति )तथा कथयामि इत्यर्थः ।।३।।

**दत्तं न दानं परिशलितं च, न शालि शीलं न तपोऽभितप्तं।**
**शुभो न भावोऽप्यभवद् भवेऽस्मिन्, विभो मया भ्रान्तमहो मुधैव ।।४।।**

**हे विभो**! हे स्वामिन्! **मया दानं** पञ्चविधं **न दत्तं**, अन्तरायकर्मोदयात् किमपि न वितरितम्। तु पुनः **शालि** मनोहरं **शीलं** ब्रह्मचर्यं **न परिशीलितं** न परिपालितं, नवधा ब्रह्मचर्यमपि न कदाचित् विशुद्ध्या रक्षितम्। न च अभितप्तं तपः कर्म- विनाशनाय, न कदापि कृतमित्यर्थः। पुनः शुभः समीचीनो भावोऽन्तःकरणशुद्धिः **अस्मिन् भवे** वर्त्तमानावतारेऽपि **न अभवत्** नासीत्। "भावना भवनाशिनी"। न भाविता। **अहो इति** आश्चर्ये, **मुधैव** मिथ्यैव **भ्रान्तं** चतुर्गतिकान्तारे पर्यटितं, यथासंभवं अवताराणामानन्त्यं रचितमित्यर्थः यदा यथोक्ते (क्ताः) दान-शील-तपो भावा अनुभूता अभविष्यन्, तदा नैतावधि भवभ्रमणमप्यत्राऽभविष्यन् ।।४।।

१. रागः द्वेषश्चापि रागसहगामित्वात् इति भावः। २.माता च पिता च मातृपितरौ-तयोः एकः शेष पितरौः इति संपूर्णं विग्रहवाक्यं संपूर्णार्थबोधार्थं मयात्र लिखितम्

**दग्धोऽग्निना क्रोधमयेन दष्टो, दुष्टेन लोभाख्यमहोरगेण।**

**ग्रस्तोऽभिमानाजगरेण माया-जालेन बद्धोस्मि कथं भजे त्वाम् ।।५।।**

हे नाथ! अहं **क्रोधः** कोपः प्रचुरो यत्र क्रोधमयः तेन **क्रोधमयेन, अग्निना दग्धः** प्रज्वलितः, कोपस्याग्निरुपत्वात्। पुनः **दुष्टेन** नीचेन **लोभः** परिग्रहः मूर्च्छा स एव आख्या नाम यस्य स लोभाख्यः, स चासौ महोरगश्च लोभाख्यमहोरगः तेन **लोभाख्यमहोरगेण,** लोभनाममहासर्पेण, **दष्टोऽ**स्मि भक्षितः, लोभस्य सर्वाऽहितत्वात् सर्पोपमा । पुनः **अभिमानः** अहङ्कारः स एवाऽ**जगरो** अजगिलः तेन अभिमानाजगरेण , **ग्रस्तः** ग्लपितः, अभिमानस्य सर्वगिलत्वात् अजगरोपमा, पुनः **माया** परवञ्चनं, स (सा) एव जालं पाशः तेन मायाजालेन **बद्धो** निगडितः **अस्मि** वर्ते, मायायाः सर्वबन्धनजालोपमा। एतादृशविशेषणोपेतः अहं **त्वां कथं भजे** – कथं ध्यायामि, यदि स्ववशो भवामि, तदैव त्वां ध्यातुं योग्यो भवामि, अन्यथा तव ध्यानं दुष्करं इति पञ्चमपद्याभिप्रायः ।।५।।

**कृतं मयाऽमुत्र हितं न चेह लोकेऽपि लोकेश! सुखं न मेऽभूत्।**

**अस्मादृशां केवलमेव जन्म जिनेश! जज्ञे भवपूरणाय ।।६ ।।**

हे **लोकानां** – चतुर्दशरज्जुप्रमितानाम्, **ईशः**स्वामी लोकेशः तत्संबोधने हे लोकेश! **मया अमुत्र** परलोके हितकारि न कृतं, येन परलोकसुखं भवेत्, पुनः न च इह अस्मिन् वर्तमानभवे, निरुपाध्यनुकुलवेद्यं सुखं मम नाऽभूत् न जातम्, यदा परलोके धर्मोद्यमः कृतोऽभूत् तदा इह लोके सुखं स्यात्। "**इह लोके धर्म्मेण, परलोके सुखं**। हे **जिनेश! अस्मादृशां** अस्मादृशानां **केवलं** निरुपाय **जन्म** जीवितं **भवपूरणाय** भवस्य संसारस्य पूरणं पूर्त्तिरचनं, तस्मै भवपूरणाय, अनेकगतिसन्तानरचनाय जज्ञे जातं अस्मज्जन्मभिः संसारपूर्त्तिरिव जाता, सर्वसामग्री लाभेऽपि दुष्टदैवतप्रेरणया देव–गुरु–धर्मपरिसेवनजनितपरमलाभप्राप्तिं विना विषयपरिपोषणेन च जन्म हारितम् ।।६।।

**मन्ये मनो यन्ननोज्ञवृत्त - त्वदास्यपीयूषमयूखलाभात् ।**

**द्रुतं महानन्दरसं कठोर - मस्मादृशां देव! तदश्मतोऽपि ।।७।।**

**हे देव**! अहं एवं **मन्ये** इत्थं संभावयामि, **यत् मनोज्ञं** सुन्दरं, **वृत्तं** आचार परिशुद्धं वर्त्तुलं (वा) यत् **त्वदास्यं** त्वन्मुखं, तदेव **पीयूषमयूखः** चन्द्रमाः, तस्य **लाभः** संयोगो दर्शनं वा, तस्मात् – मनोज्ञवृत्तत्व-दास्यपीयूषमयूखलाभात् **महानन्दः** अमृतं, सिद्धिः कैवल्यमपुनर्भव इत्यादि विशेषितं (महानन्द एव रसं पानीयं इति) महानन्दरसं मम मनो न द्रुतं न प्लुतं। 'चन्द्रस्य दर्शनात् चन्द्रोपलो द्रवति' रसस्यन्दो जायते, तच्च सुन्दर-वर्त्तुल–त्वन्मुखचन्द्रकिरणोपदर्शनादपि, अत्यानन्दरसविषयं मनो न जातम्, तत्र हेतुमाह-तन्मनः, **अश्मतोऽपि** प्रस्तरखण्डादपि **कठोरं** कठिनं, उपलखण्डादपि अतिरिच्यते। एतादृशं कठिनं चित्तं कर्मणा

कदर्थितं जातमिति अहं मन्ये संभावयामि संभावनं करोमि इत्यर्थः।। इति सप्तमश्लोकार्थः ।।७।।

**त्वत्तः सुदुःप्रापमिदं मयाऽऽप्तं, रत्नत्रयं भूरिभवभ्रमेण।**
**प्रमाद-निद्रावशतो गतं तत्, कस्याऽग्रतो नायक! पूत्करोमि ।।८।।**

हे **नायक** ! हे स्वामिन् ! इति (इदं) **रत्नत्रयं** ज्ञान-दर्शन-चारित्रात्मकं, **सु**-अतिशयेन **दुःप्रापं** दुर्लभं-सुदुःप्रापं, **भूरिभवभ्रमेण** अनेकसंसारपरिभ्रमणेन मया त्वत्तः तव सकाशात् **प्राप्तं** लब्धं आसादितम्। **तत्** रत्नत्रयं **प्रमादाः** पञ्च यतः **'मज्जं विसय कसाया निद्दा विकहाय पंच महा(दा) भणिया'** त एव निद्रा निमीलनं, तस्याः वशतः प्रमादनिद्रावशतः **गतं** गमितं। प्रमादसेवनेन लोकोऽपि धनं परवशं भूत्वा हारयति तद्वन्मयाऽपि प्रमादसेवनेन प्राप्तं दुर्लभमपि ज्ञान-दर्शन-चारित्रात्मकं रत्नत्रयं गमितम्, अथ **कस्य** अग्रतः पुरतः पूत्करोमि पूत्कारं करोमि। को हि एतादृशोऽस्ति यो हि परस्य पूत्कारमाकर्ण्य गतं धनं दापयति त्वमेवैकः प्रदाता अस्ति त्वत्तः परं न कोपि ईशः परोपकारकरणाप्रवणान्तःकरणः इत्यष्टमपद्यार्थः ।।८।।

**वैराग्यरङ्गः परवञ्चनाय, धर्मोपदेशो जनरञ्जनाय ।**
**वादाय विद्याऽध्ययनं च मेऽभूत्, कियद् ब्रूवे हास्यकरं स्वमीश ! ।।९।।**

हे **'वैराग्यरङ्ग०'** इति ।। हे **ईश! मम वैराग्यरङ्गो** विरक्तदशा, **परेषां** अन्यलोकानां वञ्चनाय - परवञ्चनाय, स्वयं निःसारतया लोका वञ्चिता। **जनरञ्जनाय धर्मोपदेशो** दत्तः धर्मस्योपदेशो दत्तः च पुनः **वादाय** वादकरणार्थं **विद्यायाः अध्ययनं**, विद्याऽभ्यासोऽभूत्, विद्या समभवस्त्य (?) वाद व केवलं रचितः, न परमार्थक्रियाकारित्वं जातम् । इत्थं **हास्यकरं** हास्यवचनं अथवा प्रहारकरणं **कियद् ब्रुवे** कियन्मात्रं कथयामि - वैराग्यमपि पालितं भवहारि, धर्मोपदेशो पि सुखकारि विद्याऽपि ज्ञान-क्रिया लाभाय स्यात्-तत एकमपि न जातं सर्वं हास्यकरं जातमिति ।।९।।

**परापवादेन मुखं सदोषं, नेत्रं परस्त्रीजनवीक्षणेन।**
**चेतः पराऽपायविचिन्तितेन, कृतं भविष्यामि कथं विभोऽहम् ।।१०।।**

**'परापवाद०'** इति, हे **विभो**! मया **परापवादेन** परदोषकथनेन **मुखं** वदनं सदोषं दोषपूरितं **कृतं**, पुनः **परेषां स्त्रियः**-परस्त्रियः, तासां**वीक्षणेन** विलोकनेन-परस्त्रीवीक्षणेन **नेत्रं** नयनं सदोषं कृतं, नेत्रमालिन्यं परस्त्रीवीक्षणेन जायते, परनिन्दया च मुखं सदोषं जायते, मलिनीभवतीत्यर्थः। पुन**श्चेतः** चित्तं परेषां अपाया विश्लेषाः, तेषां **चिन्तनं** ध्यानं (तेन) परापायचिन्तनेन सदोषं दोषसहितं कृतं, चित्तस्य मालिन्यं परदोषविचिन्तनेन जायते। एतादृशः पूर्वोक्ताऽऽचरणेन जातः, तर्हि कथं भविष्यामि? सुवृत्तशून्यस्य मम का गतिर्भाविनी, हा हा शोचितमभूत् ।।१०।।

टीप्पणकम् : १. समभ्यस्ता इति लगति

**विडम्बितं यत् स्मरघस्मरार्ति-दशावशात् स्वं विषयान्धलेन।**

**प्रकाशितं तद् भवतो ह्रियैव, सर्वज्ञ! सर्वं स्वयमेव वेत्सि ।।११।।**

**'विडम्बितं यत्'**0 इति, **हे सर्वज्ञ**! सर्ववित् **यत् स्मरः** कन्दर्पः, स एव **घस्मरः**[१] आसिसितः,तस्याऽर्ति पींडा तस्या दशा अवस्था , तद्वशात्-स्मर-घस्मरार्तिदशा- वशात्, **विषयांधलेन** विषयध्वान्तेन **स्वं** स्वकीयं आत्मानं जीवं, विडम्बितं दूषितं विषयलम्पटतया दुर्ध्यानं ध्यातं तेन आत्मा पापवशो जातः, अन्धस्य मार्गशुद्धिरपि न भवति, उन्मार्गं गच्छन् गर्त्तापातेन दुःखीभवति, तद्वन्मया विषयान्धेन विषयदुर्ध्यानादात्मा **विडम्बितः, तत्** सर्वं **भवतः** तवाग्रतः स्वव्यतिकरं प्रकाशितं प्रकटितं **ह्रिया एव** लज्जया एव, परं सर्वं मम स्वरुपं यथास्थितं सर्वज्ञत्वेन स्वयं आत्मना अखिलमपि त्वं वेत्सि जानासि, सकललोकालोकज्ञानभास्कर! भवतः अग्रे किमपि न प्रच्छन्नं, अपि तु करतलस्थितामलकवत् सर्वं प्रकटमिति ।।११।।

**ध्वस्तोऽन्यमन्त्रैः परमेष्ठिमन्त्रः कुशास्त्रवाक्यै र्निहताऽऽगमोक्तिः**

**कर्तुं वृथा कर्म कुदेवसङ्गादवाञ्छि ही नाथ मतिभ्रमो मे ।।१२।।**

**'ध्वस्तोऽन्यमन्त्रैः'**0 इति, **हे नाथ! अन्यमन्त्रैः** सांसारिक-प्रपञ्च-कुशलैर्मन्त्रैः **परमेष्ठिमन्त्रः** पञ्चपरमेष्ठिनमस्कारः, **ध्वस्तः** अपहतः इच्छापूरणगृहीतेन परमेष्ठिव्यतिरिक्तमन्त्रसाधनं कृतम्। पुनः - **कुशास्त्राणि** कामक्रियेष्टापूर्तिप्रमुखानि, तेषां वाक्यानि, तैः कुशास्त्रवाक्यैः, **आगमोक्तिः** सिद्धान्तवचनं निहिता कुशास्त्रपाठेन सिद्धान्तपाठःऽनास्थावशेन दूरीकृतः। पुनः -कुदेवसङ्गात् सांसरिकदेवसङ्गात् **कुकर्म कर्तुं** कुत्सितक्रियां कर्तुं **अवाञ्छि** वाञ्छितम्। **एवं मतिभ्रमः** बुद्धिभ्रष्टता जाता, बुद्धिभ्रष्टस्य सत्य-स्वरूपत्यागेन असत्यस्वरुपादरेण च भ्रमविशेषत्वं भवति, अतो मम निर्बुद्धेः किं किं चरितं जातम् ।।१२।।

**विमुच्य दृग्लक्ष्यगतं भवन्तं, ध्याता मया मूढधिया हृदन्तः।**

**कटाक्ष-वक्षोज गभीरनाभि, कटीतटीयाः सुदृशां विलासाः ।।१३।।**

**'विमुच्य दृग्लक्ष्य'**0 इति हे नाथ! **मूढा** विकला धीर्यस्य मूढधीः, तेन मूढधिया, **दृग्लक्ष्यगतं** नयनगोचरं जातं, **भवन्तं विमुच्य** त्यक्त्वा, **हृदन्तः** चित्तमध्ये सुदृशां स्त्रीणां कटाक्षः नेत्रविकूणितानि, वक्षोजानि स्तनानि, गंभीरानाभी-गंभीरोदरकूपिका, **कटीतटी**-कटिप्रदेशः, तेषां इमे-कटाक्ष-वक्षोज-गभीरनाभी कटीतटीयाः, विलासाः विभ्रमाः ध्याताः ध्यानगोचरीकृताः। वीतरागदर्शने स्थितोऽपि मनोहरनारी नेत्रविकुणितरसिकोऽहं जातः, पुनस्तत्रैव स्त्रीस्तनौ विलोकितौ, पुनः गभीरनाभिविलोकनं कृतम्। पुनस्तत्रैव कटितटावलोकनं कृतम्, परंतु त्वं संमुख-मागतोऽपि शुद्धचेतसा दृग्गोचरीभूतोपि न, एतादृशं मम दुष्टबुद्धित्वं जातम् किं किं कथयामि ।।१३।।

टीप्पनकं : १.भक्षकस्तु घस्मरोऽद्मर आशितः अभि: चिन्ता.३९४

**लोलेक्षणावक्त्रनिरीक्षणेन,यो मानसे रागलवो विलग्नः।**

**न शुद्धसिद्धान्तपयोधिमध्ये, धौतोऽप्यगात् तारक! कारणं किम् ।।१४।।**

**'लोलेक्षणा'**0 इति-हे **तारक**! तारयति संसारसागरादिति तारकः, तत्संबोधने हे तारक!। लोलानि चपलानि ईक्षणानि नयनानि यस्या सा लोलेक्षणा, तस्या **वक्त्रं** मुखं, तस्य **निरीक्षणेन** विलोकनेन लोलेक्षणावक्त्रनिरीक्षणेन। **मानसे** मनसि यो **रागलवः** प्रेमांशो **विलग्नः** क्षुभितः स रागलवः। **शुद्धानि** निर्दोषाणि **सिद्धान्तानि** एव **पयोधयः** समुद्राः, तेषां **मध्यं** मध्यभागः तत्र, शुद्धसिदधान्तपयोधिमध्ये। **धौतोऽपि न अगात्** न गतः तत्र किं कारणम्? को हेतुरिति, स्त्रीमुखदर्शनेन मनो रागमलिनं जातं, तन्मनो (मनः) सिद्धान्तसमुद्रान्तः प्रक्षालितमपि न शुदधं जातम् वस्त्रादि धौतं सत् उज्ज्वलं जायते। एतत् तु मलिनमेव स्थितं अत्र किं कारणं? त्वं कथयेतिभावः कर्मकाठिन्यमेव कारणमिति भावः ।।१४।।

**अङ्ग न चङ्गं न गणो गुणानां, न निर्मलः कोऽपि कलाविलासः।**

**स्फुरत्प्रभा न प्रभुता च काऽपि, तथाप्यहंकारकदर्थितोऽहम् ।।१५।।**

**'अङ्ग न चङ्गं न'**0 इति हे नाथ! मम **अङ्गं** शरीरं यल्लब्धं तन्न **चङ्गं** न सुन्दरं प्राप्तं। गुणानां औदार्यादीनां मध्यात् न कोऽपि गुणः प्राप्तः, पुनः **कोपि निर्मलो** विशुद्धकलाविलासोऽपि न, अदभुत-कलाविलसितमपि न, पुनः **स्फुरत्प्रभा** देदीप्यमानकान्तिः, **प्रभुता** अधीश्वरताऽपि न काचित् प्राप्ता। तथाऽपि **अहङ्कारेण** अभिमानेन, कदर्थितो जातः। अङ्ग-सौन्दर्येणाहङ्काराविर्भावः गुणैरपि गणना भवेत्, निर्मलकलाविलसितेनाऽपि लोके मान्यत्वं जायते, अप्यधिकप्रभावप्रभुत्वेनापि पूज्यो भवति। परन्तु एतावत्सु कतिपयमपि न प्राप्तं मुधाहङ्कारकदर्थना संजाता इदमपि हास्यकारित्वधमस्ति -इति भावः ।।१५।।

**आयुर्गलत्याशु न पापबुदधि; र्गतं वयो नो विषयाभिलाषः।**

**यत्नश्च भैषज्याविधौ न धर्मे, स्वामिन्! महामोहविडम्बना मे ।।१६।।**

**'आयुर्गलति'**0 इति, **हे नाथ ! आशु** शीघ्रं **आयु**र्जीवितं **गलति** हीयते परन्तु **पापबुदधि र्न** गलति आयुःक्षयेऽपि पापकरणबुद्धिस्तादृशी एव तिष्ठति। **हे स्वामिन्! मम वयो** बाल्य-तारुण्य-वार्धि(र्ध) क्यादि, अनुक्रमेण **गतं** परन्तु विषयाणां कामभोगानां अभिलाषः कामविषयाभिलाषो न गतः। तारुण्ये सति यादृशं विषयाकुलितं मनोऽभूत् तादृशं मनो वार्धि(र्ध) क्येऽपि अभूत्। पुनः **भैषज्यविधौ'** औषध्यादिकरणे कारावणे (कारणे) य यत्नः कृतः, परन्तु धर्मविषये कदापि यत्नो न कृतः । इयं **मम महामोहस्य** सदा मोहनीयकर्मणो **विडम्बना** महामोहविडम्बना वर्तते। मोहाकुलाः प्राणिनो वयसि गतेऽपि कामातुरा भवन्ति। पुनर्मोहान्धाः स्वपरनिमित्तं औषध्यादियत्नं कुर्वन्ति परं न धर्मयत्नं कुर्वन्ति। एतत् **सर्वं** मोहविलसितमेव, यदात्महिते पापप्रसङ्ग-त्यागो विषयविलासो[१] धर्मयत्नश्च क्रियते तदेव हितम्।।१६।।

टीप्पनकं - १. विषयविलासत्यागो इति युक्तम्।

**नाऽऽत्मा न पुण्यं न भवो न पापं, मया विटानां कटुगीरपीयम्,**

**अधारि कर्णे त्वयि केवलार्के, परिस्फुटे सत्यपि देव! धिङ् माम् ।।१७।।**

**'नात्मा न पुण्यम्'**० इति हे नाथ! नास्तिकानां मते **आत्मा नास्ति न च पुण्यं** वर्त्तते **न पुनः पाप**मस्ति, अतः सर्वरहिते संसारे शुन्यमेव सर्वमस्ति। आत्मनोऽभावे कर्तृत्वं न, तदभावे पुण्य-पापौ(पे) न, अतः न कश्चित् कर्ता भोक्ता च, एवं **विटानां** कुटिलपाखण्डिनां नास्तिकानां **कटुगीः** कटुकवाणी, **अपि इयं** पूर्वोक्तां कर्णे कण- विषये आधारे, अधारि धृतो, कस्मिन् सति? परिस्फुटे च प्रकटे केवलार्के केवलज्ञान- भास्करे त्वयि भगवति सत्यपि, वर्तमानेऽपि त्रिषष्ट्यधिकत्रिशत (३६३) पाषण्डिकानां मतं श्रवणगोचरीकृत्वा त्वद्‌वचोमृतं परास्तम् साक्षाद्‌वर्तमानेऽपि त्वयि ज्ञानसूर्ये मम मोहान्धता जाता तस्मात् हे देव! हे परमेश्वर! **मां धिग्** अस्तु धिक्‌कारोऽस्तु। यदीदृशो मतान्धोहं ज्ञानभास्करं परमेश्वरं त्वां नाऽऽज्ञासिषामि स(तद)पि हास्यकारणं कियत् तद् ब्रुवे इति ।।१७।।

**न देवपूजा न च पात्रपूजा, न श्राद्धधर्मश्च न साधु धर्मः ।**

**लब्ध्वाऽपि मानुष्यमिदं समस्तं, कृतं मयाऽरण्यविलापतुल्यम् ।।१८।।**

**'न देवपूजा'**० इति हे नाथ ! मया सामग्रीलाभेऽपि **देवपूजा** वीतरागार्चा न कृता **च** पुनः **पात्राणां** साधु -साधर्मिकाणां **पूजा** अशन-सत्क्रियादिकां पात्रपूजा न कृता । पुनः **श्राद्धानां** द्वादशव्रतधारिणां, धर्मव्रतपालनं न कृतम्, पुनः **साधूनां** मुनीनां **धर्मः** पञ्चमहाव्रतरुपः साधुधर्मः न कृतः न चीर्णः । **इदं** प्रत्यक्षं **समस्तं** कुलजाति-क्षेत्र-शरीर संहननादियुक्तं **मानुष्यं** मनुष्यभवं आर्यभूमिगतमपि लब्ध्वा प्राप्य **आ(अ)रण्ये विलापा** रुदितानि, तेषां **तुल्यं** समानं अरण्यविलापतुल्यं निरर्थकं कृतम् अरण्ये रुदितं कः शृणोति? तद्‌वत् सर्वमपि अकरणे प्रत्यवायो जात इत्यर्थः ।।१८।।

**चक्रे मया ऽसत्स्वपि कामधेनु - कल्पद्रु-चिन्तामणिषु स्पृहार्त्तिः ।**

**न जैनधर्मे स्फुटशर्मदेऽपि, जिनेश! मे पश्य विमूढभावम् ।।१९।।**

**'चक्रे मयाऽसत्सु'**० इति हे **जिनेश ! मया** अज्ञानिना **असत्स्वपि** असारेष्वपि कामधेनुः कामगवी, कल्पद्रुः कल्पवृक्षः, चिन्तामणिः देवरत्नं, (कामधेनु-कल्पद्रु-चिन्तामणयः ) तेषु **कामधेनु-कल्पद्रु - चिन्तामणिषु स्पृहा** वाञ्छा तस्यार्त्तिः अघदः दोषदा (?) **स्पृहार्त्तिः चक्रे** कृता एव, एतस्मिन् काले कामधेनु-कल्पवृक्ष-चिन्तामणयो न सन्ति, तथाऽपि अविद्यमानेषु विद्यमानवत् प्रसङ्गः कृतः। परन्तु स्पृहार्त्तिः **स्फुट- शर्मदेऽपि** प्रकटसौख्यकारिण्यपि, **जैनधर्मे** वीतरागमतेऽपि न चक्रे न कृता, विधिनाऽऽराधितो हि जैनधर्मः इहामुत्र वाञ्छितफलोपलब्धये भवति, तथापि मूढधिया धर्ममवगण्य संसारवर्धिष्णु-वस्तुनि वाञ्छा

रचिता, तेन स्वामिन्! **मम विमूढभावं** मम मूर्खस्वभावं **पश्य** विलोकय। "**मूर्खस्य हृदयं शून्यं**" इति तदेव जातमित्यर्थः इदमपि हास्यकरम् ।।१९।।

**सद्भोगलीला न च रोगकीला, धनागमो नो निधनागमश्च ।**

**दारा नु(न)कारा नरकस्य चित्ते, व्यचिन्ति नित्यं मयकाऽधमेन ।।२०।।**

'**सद्भोगलीला**'0 इति हे नाथ! **अधर्मेन** नीचेन **मयका** मया **सद्भोगलीला** चित्ते नित्यं सदैव **व्यचिन्ति** ध्याता, परं **रोगकीला** रोगशङ्कु न चावधारिता, किञ्च 'भोगे रोगभयं' इति न ध्यातम् । पुनश्चित्ते नित्यं **धनागमो** धनलाभो **व्यचिन्ति** च । पुनःश्चित्ते **दाराः** स्त्रियो व्यचिन्ति ध्याताः, परन्तु नरकपठ(त)नस्य **कारा** दरी न व्यचिन्ति न ध्याताः किञ्च 'स्त्रियो नरकसाधनम्' इति न चिन्तितम् इत्थं सर्वमपि अधर्माचारः अनेकवेलं प्राप्तानां भोग-धन-दाराणांरोग निधन-नरकपातकारणानां चिन्तनं निःफलं, एको वीतरागोक्तधर्मो ध्यानो (धर्मस्य ध्यानम्) अभयप्रदः ।।२०।।

**स्थितं न साधोर्हृदि साधुवृत्या, परोपकारान्न यशोऽर्जितं च ।**

**कृतं न तीर्थोद्धरणादि कृत्यं, मया मुधा हारितमेव जन्म ।।२१।।**

'**स्थितं न साध्विति**'0 **साधोः** साधुपुरुषस्य **हृदि** चित्ते, **साधुवृत्त्या** भव्याचारेण नि **(न) स्थितम्** निष्ठितम् 'साधूनां दर्शनं पुण्यं', तीर्थभूता हि साधवः (   ) इत्यादिबुदध्या साधवो न ज्ञाताः। पुनः **परोपकारात्** परोपकारकरणात् **यशः** कीर्त्तिः, **नार्जितं** नोपार्जितम् '**परोपकारः पुण्याय, पापाय परपीडनम्**' इति ज्ञात्वा यशो नाऽर्जितम् च । पुनः **तीर्थोद्धरणादिकृत्यं** शत्रुञ्जयादिमहातीर्थोद्धारकार्यं कृतम् '**गत्वा शत्रुञ्जयं तीर्थं, नत्वा रैवतकाचलम्, स्नात्वा गजपदेकुण्डे पुनर्जन्म न विद्यते**। इति बुध्या तीर्थसेवा न कृता। **अहो** इति आश्चर्ये **मुधा** निःफलं **जन्म हारितं** एव इदमपि **सर्वं** हास्यकरम् इति ।।२१।।

**वैराग्यरङ्गो न गुरुदितेषु, न दुर्जनानां वचनेषु शान्तिः।**

**नाऽऽध्यात्मलेशो मम कोपि देव!, तार्यः कथङ्कारमयं भवाब्धिः ।।२२।।**

'**वैराग्यरङ्ग**'0 इति, हे **देव गुरुदितेषु** गुरुकथितेषु, उपदेशेषु, **वैराग्यरङ्गो** विरक्तिप्रसङ्गो नाऽभूत्, दुर्जनानां दुरात्मनां खलानां **वचनेषु** वाक्येषु शान्ति र्नाऽभूत् किञ्च- **दुर्जनवदनविनिर्गतेन, वचनभुजङ्गमेन सज्जनो दष्टः । तद्विषघातनिमित्तं विद्वन् ! शान्त्यौषधं पिबामो ।१।** इत्यादिसुभाषितेन दुर्जनवचनसञ्जातः कोपः-शान्ति र्नागता। पुन **मम कोऽपि अध्यात्मलेशो** राग द्वेषरहितचित्तवृत्ति र्नाऽस्ति । यतः-'**अध्यात्मं भावमानानां, राग द्वेषादयो नहि, परमानन्दसंप्राप्ति र्जायते शिवसङ्गतिः ।२।**

एवं अध्यात्मलेशोऽपि नाऽभूत्, तर्हि कथं केन प्रकारेण **भवाब्धिः** भव- समुद्रस्**तार्यः** तारणाय अर्हः तार्यः, प्रकरण (प्रतरण) योग्यो भवेत् ? अपि तु न भवेत् तदपि सर्वं हास्यकरं ज्ञेयम् ।।२२।।

**पूर्वे भवेऽकारि मया न पुण्य-मागामिजन्मन्यपि नो करिष्ये ।**

**यदीदृशोऽहं मम तेन नष्टा, भूतोद्भवद्भाविभवत्रयीश ! ।।२३।।**

**'पूर्वेऽकारि'**0 इति **हे ईश! मया पूर्वे भवे पुण्यं** धर्मकृत्यं न **अकारि** न कृतं, पुनः **आगामि जन्मनि** आगमिष्यद्भवेऽपि पुण्यं नो करिष्ये, यदि पुनः अधुना **ईदृशः** अपुण्य एव जातः, कथं? **प्राचीनजन्मनि कृतं पुण्यं इह जन्मनि फलति** तेन पुण्येन वर्त्तमानो भवः पुण्यविषयः स्यात्। तत्र पुण्येषु सत्सु आगामि भवे पुण्यसञ्चयो जायते, अतः पूर्वभव-वर्तमानभवाऽऽगामिभवानां पुण्यकर्मणा नरः सुखी भवति। अहं तु ईदृशो नास्मि, **तेन मम भूतोऽनुभवद्-भावि-भावत्रयी** गतभव-वर्त्तमानभवाऽऽगामिभवत्रयी **नष्टा** नाशं गता इति संचिन्तयामि यतः **'अदत्तभावाच्च भवेद् दरिद्री, दरिद्रभावाच्च करोति पापम्। पापप्रभावान्नरकं प्रयाति, पुनर्दरिद्री पुनरेव पापी** ।।१।।

इति कृत्वा पुण्यस्याऽनुपार्जनान्मम भव-त्रयमपि नष्टं, निरर्थकं जातमिति इदमपि सर्व हास्यकरं कियद् ब्रूवे ।।२३।।

**किं वा मुधाऽहं बहुधा सुधाभुक्-पूज्य ! त्वदग्रे चरितं स्वकीयम्।**

**जल्पामि यस्मात् त्रिजगत् स्वरुप-निरुपकस्त्वं कियदेतदत्र ।२४।**

**'किं वा मुर्धा'**0 इति - हे (सुधाभुक्) पूज्य ! **सुधा**-अमृतं भुञ्जन्ति इति सुधाभुजो देवाः, सुधाभुजां **पूज्य** अर्चनीयः सुधाभुक्पूज्यः तत्सम्बोधने - हे सुधाभुक्पूज्य! **बहुधा** बहुप्रकारं **चरितं** स्वकीयवृत्तान्तम्, त्वदग्रे-तवाग्रे **किं वा** इति पक्षान्तरे अहं **एतादृशो मुधा** निरर्थकं **जल्पामि** कथयामि, एतावत् कथनम् मम निःफलं दृश्यते, कथं तत **यस्मात्** कारणात् **त्वं** भगवान्, त्रिणि जगन्ति समाहृतानि त्रिजगत्, तस्य **स्वरुपं** वृत्तान्तं **निरूपयति** यथातथं कथयति इति त्रिजगत्स्वरुपनिरुपकः जगत्त्रयमध्यवर्ती(र्त्ति)सकलवस्तूत्पत्ति-स्थिति विनाशवेदकोऽसि सर्वज्ञोऽसि, अतः कारणात् अत्र एतन्निजचरितं मदीयस्वरुपं क्यिद् वर्त्तते ? अपि तु सर्वज्ञस्य भवतोग्रे अकिञ्चित्करमेव, **ज्ञानिनोग्रे ज्ञापनं पिष्टपेषणमेव** इति इदमपि हास्यकरं जातम् ।।२४।।

**दीनोद्धारधुरन्धरस्त्वदपरो नास्ते मदन्यः कृपा -**

**पात्रं नात्र जने जिनेश्वर! तथाऽप्येतां न याचे श्रियम् ।**

**किन्त्वर्हन्निदमेव केवलमहो सद्बोधिरत्नं शिवं,**

**श्री रत्नाकर! मङ्गलैकनिलय! श्रेयस्करं प्रार्थये ।।२५।।**

**हे जिनेश्वर**! जिनाः सामान्यकेवलिनः तेषां ईश्वरः तीर्थकृत् कर्मोपार्जनाच्चतुस्त्रिंशदतिशयधरः तस्य संबोधने हे जिनेशा दीनाः दयालवः अनुकम्प्याः तेषां उद्धारः उद्धरणं परिरक्षणं, तत्र धुरं धरति इति-धुरन्धरः धुर(धुर्) भारोद्धरणसमर्थः धुरन्धर इव धुरन्धर; दीनोद्धारे धुरन्धरो **-दीनोद्धारधुरन्धरः त्वत्तोऽ** परो **त्वदपरो** न आस्ते न एतद् द्वयमेवान्वयी वर्त्तते, त्वद्व्यतिरिक्तः अन्यः कोऽपि दीनाऽवनसमर्थो न वर्त्तते मत्तोऽन्यो मदन्यो मद्व्यतिरिक्तः, कोऽपि कृपायाः करुणायाः, पात्रं-आस्पदं कृपापात्रं नास्ति, **अत्र जने** इहलोक-परलोकवर्तिमनुष्यकदम्बके, वर्त्तते पर्याप्तमेव बहुतरं व्यतिकरप्रपञ्चेन, तथाऽपि **एतां** इहलोकवाञ्छ्यां **श्रियं** लक्ष्मीं न याचे न प्रार्थये, तर्हि किं प्रार्थये ? तदेवाह - अर्हति महति चतुष्षष्टीन्द्रकृत-पूजायोग्यो भवति इति अर्हन्, तस्य संबोधने हे अर्हन्! पुनः श्रिया युक्तो रत्नानामाकरः श्रीक्षीरवारांनिधि-स्तद्वन्मङ्गलायैकोऽद्वितीयो निलयो निवासः श्री रत्नाकरमङ्गलैकनिलयः। अथवा श्रियः शिवलक्ष्म्याः रत्नानि ज्ञान-दर्शन-चारित्राणि, तेषामाकरो **महानिकरश्च** मङ्गलानि भुवनसमीहितसिद्धयः तेषामेकोऽद्वितीयो निवासः श्री रत्नाऽऽकरमङ्गलैकनिलयः तत्संबोधने! श्रीरत्नाकरमङ्गलैकनिलय! **इदमेव** प्रत्यक्षमेव **केवलं** एकं **श्रेयस्करं** शस्तकरं, सती साध्वी **बोधेः** समस्तं तद्रत्नं **शिवं** परमानन्दं याचे प्रार्थये 'दुह् पाच्यर्थधातूनां द्विकर्मकत्वमपि तदा **सद्बोधिरत्नं** शिवं याचे सम्यक्त्वं विना शिवं नास्तीत्यन्वयात् **अन्यत्** किमपि न याचे, एतावतैव मम सकल-समीहितसिद्धिरस्ति, 'श्री रत्नाकर इति' पदेन श्री रत्नाकरसूरिनामसङ्केतोऽपि ज्ञेयः ।।२५।।

**-: प्रशस्ति :-**

**श्रीमन्तो विजयाद् दया गणधरा, पुण्यप्रभा भासुराः,**

**साम्राज्यं चरमार्हतस्तप-गणे, कुर्वन्ति ये सांप्रतम् ।**

**तेषां शासनमाश्रितस्य विनता, .....................**

**भोजासागरवपाठकेन रचिता, वृत्तिःस्तवेऽल्पीयसि ।।**

टीप्पनकम्: १.पद्यांशः न स्फुटतरः भाति।

## अज्ञातकर्तृकवृत्तिसमेतम्-

# ।। भक्तामरस्तोत्रम् ।।

-साध्वीजीश्री क्षमानिधिश्रीजी

* नि:श्रेयसम्-२ मां प्रकाशित थइ रहेल-आ अज्ञात कर्तृक वृत्तिनी हस्तप्रत महावीर जैन आराधना केन्द्र-कोबा (जि.गांधीनगर) स्थितहस्तप्रतभंडारमां क्रमांक १३६४२ मां नोंधायेल ६ पत्रनी प्रतनी झेरोक्ष कोबा ज्ञानभंडारमां संचालक श्री द्वारा प्राप्त थई छे आ एक प्रतने आधारे संपादन शक्य बन्युं छे...संस्थानो तो आभार मानुं छुं-संपादन दरमियान केटलाक मुद्दा नजरे चढ्या छे ते रजू करु छुं.

पद्य-१ 'समर्थ विशेषणाद् विशेष्यं लभ्यते' आ न्याय- ''अर्थ घटना माटेनी शास्त्रीय/लौकिक सूचना''नो उपयोग करीने 'प्रथमंजिनेन्द्रम्'नो अर्थ 'आदिजिनेन्द्रम्' आप्यो छे जो के 'ऋषभजिनेन्द्रम्' आप्यो छे जो के 'ऋषभजिनेन्द्र' के 'बृषभजिनेन्द्र' अर्थ अपायो होत तो वधु उचित थात। उद्योतमति इति उद्योतकम् आ व्युत्पत्ति प्रायः आ वृत्तिमां छे। 'मौलिमणि' नो विग्रह अधिकरण सप्तमी थी कर्यो छे।

पद्य-३ 'विगतगयः'नी वृत्तिमां अस्मि क्रियापद शा माटे वापर्यु ते माटे पण प्रसिद्ध/यत्रान्यत् क्रियापदं न श्रूयते, तत्र अस्ति-भवति इत्यादि परः प्रयुज्यते न्याय दर्शावायो छे।

पद्य-१० 'भूवन भूषण भूतनाथ!' एम बे स्वतंत्र विशेषण छे।

पद्य-११ 'जलनिधेरसितुं' मां 'असितुं' पदच्छेद छे।

पद्य-३६ मां उत्स्फुलिङ्गम् शब्द प्रयोजायो छे।

पद्य-४० 'यानपात्र' शब्दनो टीका-अर्थ 'वाहन' कर्यो छे जेनुं गुजराती उच्चारण 'वाहण' प्रचलित छे।

पद्य-४१ 'जलोदरं' नो विग्रह मध्यमपद समास थी कर्यो छे. 'जलेन युक्तं उदरम्'-इति

---

**भक्तामरप्रणतमौलिमणिप्रभाणा-मुद्द्योतकं दलितपापतमोवितानम्।**
**सम्यक् प्रणम्य जिनपादयुगं युगादा-वालम्बनं भवजले पततां जनानाम्।।**
**यः संस्तुतः सकलवाङ्मयतत्त्वबोधा-दुद्भूतबुद्धिपटुभिः सुरलोकनाथैः।**
**स्तोत्रैर्जगत्त्रितयचित्तहरैरुदारैः स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम्।।१-२।।** युग्मम्

**१-२ अज्ञातः—वर्धमान**जिनं नत्वा सर्वातिशयशालिनम्।
बालबोधकृते **भक्ता-मर**स्यार्थो विधीयते।।१।।

'किल' इति सत्ये, **तं प्रथमं जिनेन्द्रं अहमपि स्तोष्ये** इत्यन्वयः, 'स्तोष्ये' इति क्रियापदम्, कः कर्त्ता? -'अहम्', कथं ?-'अपि', स्तोष्ये। कं कर्मतापन्नम् ?-'जिनेन्द्रम्', किं विशिष्टं ?-'प्रथमम्', ''समर्थविशेषणाद् विशेष्यं लभ्यते'' इति न्यायात्-'आदिजिनेन्द्रम्-इत्यर्थः। किं विशिष्टं ?-'तम्', यच्छब्दस्तच्छब्दमपेक्ष्यते, यत्-तदोर्नित्याभिसंबंधात्। तं कं ?-**यः सुरलोकनाथैः संस्तुतः** -'संस्तुतः' इति क्रियापदं, कैः कर्तृभिः ?-'सुरलोकनाथैः, 'सुराणां लोकाः-सुरलोकाः, सुरलोकानां नाथाः-सुरलोकनाथाः, तैः सुरलोकनाथैः, इन्द्रैः इत्यर्थः। संस्तुतः कः ?-'यः'। सुरलोकनाथैः किंलक्षणैः ?-**उद्भूतबुद्धिपटुभिः**-उद्भूता चासौ बुद्धिश्च-उद्भूतबुद्धिः, उद्भूतबुद्ध्या पटवः-उद्भूतबुद्धिपटवः, तैः उद्भूतबुद्धि-पटुभिः। कुतः ? -**सकलवाङ्मयतत्वबोधात्**-सकलं च तद् वाङ्मयं च-सकलवाङ्मयं, सकलवाङ्मयस्य तत्त्वं सकलवाङ्मयतत्वं, सकलवाङ्मय-तत्त्वस्य बोधः

सकलवाङ्मयतत्त्वबोधः, तस्मात् सकलवाङ्मयतत्त्व-बोधात् । कैः कृत्वा संस्तुतः ?-**स्तोत्रैः**- किंलक्षणैः-स्तोत्रैः ?-**जगत्त्रितयचित्तहरैः**-त्रिभुवनजनमनोरञ्जकैः, जगतां त्रितयं-जगत्त्रितयं, जगत्त्रितयस्य चित्तानि-जगत्त्रितयचित्तानि, जगत्त्रितयचित्तानि हरन्ति इति-जगत्त्रितयचित्तहराणि, तैः जगत्त्रितयचित्तहरैः पुनः किंलक्षणैः स्तोत्रैः ?-**उदारैः** सारैः महार्थैः इत्यर्थः ॥१॥ किं कृत्वा स्तोष्ये ?-**प्रणम्य,** प्रणिपत्य, कथं ?-**सम्यक्,** किं कर्मतापन्नम् ?-**जिनपादयुगम्**- पादयोर्युगम्-पादयुगम्, जिनस्य पादयुगम्-जिनपादयुगं । जिनपादयुगं किं लक्षणम् ?-**आलम्बनम्,** केषां? -**जनानाम्,** जीवानाम्, किं कुर्वताम् ?-**पतताम्,** ब्रूडताम् क्व ?-**भवजले**-भव एव जलं- भवजलं, तस्मिन् भवजले, कस्मिन् काले जिनपादयुगम् आलम्बनं ?-**युगादौ** युगस्य आदिः-युगादिः, तस्मिन् युगादौ, पुनः कीदृशं जिनपादयुगम् ?-**उद्द्योतकम्**-उद्द्योतयति इति उद्द्योतकम्, प्रकाशकारकम्, कासाम् ?-**भक्तामरप्रणतमौलिमणिप्रभाणाम्**-भक्ताश्च ते अमराश्च भक्तामराः, प्रणताश्च ते मौलयश्च प्रणतमौलयः, भक्तामराणां प्रणतमौलयः-भक्तामरप्रणतमौलयः, भक्तामरप्रणतमौलिषु मणयः-भक्तामरप्रणत-मौलिमणयः, भक्तामर-प्रणतमौलिमणीनाम् प्रभाः- भक्ता[मरप्रणत-मौलिमणि]प्रभाः, तासाम् भक्तामरप्रणतमौलिमणिप्रभाणाम्, पुनः किं लक्षणं जिनपादयुगम् ?-**दलितपापतमोवितानम्**-तमसो वितानं-तमोवितानं, पापमेव तमोवितानं पापतमो- वितानम्, दलितं पापतमोवितानं येन तत्-दलितपापतमोवितानम् ॥२॥

**बुद्ध्या विनाऽपि विबुधार्चितपादपीठ! ,**
**स्तोतुं समुद्यतमतिर्विगतत्रपोऽहम् ।**
**बालं विहाय जलसंस्थितमिन्दुबिम्ब-**
**मन्यः क इच्छति जनः सहसा ग्रहीतुम् ? ॥३॥**

**३-अज्ञातः—**हे **विबुधार्चितपादपीठ ! अहं विगतत्रपोऽस्मि ।** यत्राऽन्यत् क्रियापदं न श्रूयते, तत्र 'अस्ति-भवति' इत्यादि परः प्रयुज्यते । (१)

पादयोः पीठं-पादपीठं, विबुधानां[१] अर्चितं विबुधार्चितं, विबुधाऽर्चितं पादपीठं यस्य सः विबुधार्चितपादपीठः तस्य संबोधनं क्रियते-हे विबुधार्चितपाद-पीठ ! । विगता त्रपा यस्मात् स विगतत्रपः । पुनः कीदृशोऽहं-**समुद्यतमतिः**-समुद्यता मतिः यस्य स, उद्यतबुद्धिः इत्यर्थः । किं कर्तुं ?-**स्तोतुं,** कथं ? -**विना,** कया ?-**बुद्ध्या** मत्या । उक्तमर्थं दृष्टान्तेन दृढयति-**कोऽन्यो जनः सहसा इन्दुबिम्बं ग्रहीतुं इच्छति**-इन्दोः बिम्बं इन्दुबिम्बं तत् । कथम् ?-**सहसा** इन्दुबिम्बं किंभूतं ?-**जलसंस्थितम्**-जले संस्थितं- जलसंस्थितं, तत् । किं कृत्वा ?-**विहाय** त्यक्त्वा । कं कर्मतापन्नम् ?-**बालं**-अज्ञशिशुमित्यर्थः ॥३॥

१. अन्यत्र टीकासु 'बिबुधैः' इति तृतीयासमासः ।

**वक्तुं गुणान् गुणसमुद्र ! शशाङ्ककान्तान्,**
**कस्ते क्षमः सुरगुरुप्रतिमोऽपि बुद्ध्या ? ।**
**कल्पान्तकालपवनोद्धतनक्रचक्रं,**
**को वा तरीतुमलमम्बुनिधिंभुजाभ्याम् ? ॥४॥**

**४-अज्ञातः—**हे **गुणसमुद्र** !-गुणानां समुद्रः- गुणसमुद्रः, तस्य [संबोधनम्], । **ते** तव, **गुणान् वक्तुं** प्रतिपादयितुं, **कः क्षमः** समर्थोऽस्ति ?-अपि तु न कोऽपि। गुणान् किंभूतान् ?-**शशाङ्ककान्तान्** चन्द्रोज्ज्वलान्,-शशः अङ्के यस्य सः-शशाङ्कः शशाङ्कवत् कान्ताः-शशाङ्ककान्ताः, तान् । कः कीदृशोऽपि ?-**सुरगुरुप्रतिमोऽपि** बृहस्पतितुल्योऽपि, सुराणां गुरुः-सुरगुरुः, सुरगुरोः प्रतिमः-सुरगुरुप्रतिमः । कथं ?-**अपि** । कया ?-**बुद्ध्या** । दृष्टान्तमाह-**को वा अम्बुनिधिं भुजाभ्यां तरीतुं अलं** समर्थो भवेत् ?-न कश्चिदपि । कीदृशम् **अम्बुनिधिम्** ?-**कल्पान्तकालपवनोद्धतनक्र-चक्रम्** । कल्पान्तकालस्य पवनः कल्पान्तकालपवनः, कल्पान्त-कालपवनेन उद्धतानि-कल्पान्तकालपवनोद्धतानि, नक्राणां चक्राणि-नक्रचक्राणि । कल्पान्तकालपवनोद्धतानि नक्रचक्राणि यत्र स-क०कल्पान्त-कालपवनोद्धतनक्रचक्रः, तं कल्पान्तकालपवनोद्धतनक्रचक्रम् ॥४॥

**सोऽहं तथापि तव भक्तिवशान्मुनीश!,**
**कर्तुं स्तवं विगतशक्तिरपि प्रवृत्तः ।**
**प्रीत्याऽऽत्मवीर्यमविचार्य मृगो मृगेन्द्रं,**
**नाभ्येति किं निजशिशोः परिपालनार्थम् ? ॥५॥**

**५ अज्ञातः—**हे मुनीश ! **सः अहं तथापि तव स्तवं कर्तुं प्रवृत्तः**[अस्मि] । मुनीनां ईशः-मुनीशः, तस्य संबोधनं क्रियते हे मुनीश ? । अहं कीदृशोऽपि ?-**विगतशक्तिः अपि,** विशेषेण गता शक्तिः यस्य सः-विगतशक्तिः । स्तवं कर्तुं कस्मात् प्रवृत्तोऽस्मि ?-**भक्तिवशात्**-भक्तेः वशः-भक्तिवशः, तस्मात् भक्तिवशात् । दृष्टान्तमाह--**मृगः किं मृगेन्द्रं न अभ्येति** ?- अपि तु आगच्छत्येव । मृगाणां इन्द्रः-मृगेन्द्रः, तम् मृगेन्द्रम्, किमर्थम् ? **परिपालनार्थम्**-रक्षणाय । परिपालनाय इति परिपालनार्थम् । कस्य ?-**निजशिशोः,** निजस्य शिशुः-निजशिशुः, तस्य निजशिशोः, किं कृत्वा ?-**अविचार्य,** किं कर्मतापन्नम् ? -**आत्मवीर्यम्,** निजबलम्-इत्यर्थः, आत्मनो वीर्यं-आत्मवीर्यम्, तत् आत्मवीर्यम्, कया ?-**प्रीत्या** स्नेहेन-इत्यर्थः ॥५॥

**अल्पश्रुतं श्रुतवतां परिहासधाम,**
**त्वद्भक्तिरेव मुखरीकुरुते बलान्माम् ।**
**यत् कोकिलः किल मधौ मधुरं विरौति,**
**तच्चारुचूतकलिकानिकरैकहेतुः ॥६॥**

**६ अज्ञातः**—हे नाथ ! **त्वद्भक्तिरेव मां मुखरीकुरुते**-इत्यन्वयः । तव भक्तिः-त्वद्भक्तिः । अमुखरं मुखरं कुरुते मुखरीकुरुते-वाचालं कुरुते इत्यर्थः । कथं ? **बलात्** हठात्, मां किं लक्षणं ?-**अल्पश्रुतं**-अल्पं अल्पानि श्रुतानि यस्य स अल्पश्रुतः तं-अल्पश्रुतम् । पुनः किंलक्षणं माम् ?-**परिहासधाम** परिहासस्य धाम, हास्यास्पदम् । केषाम् ?-**श्रुतवताम्**-श्रुतं विद्यते येषां ते-श्रुतवन्तः, तेषां श्रुतवताम्, दृष्टशास्त्राणाम् इत्यर्थः । अर्थदृढीकरणायाह-**किल** इति सत्ये, **यत् कोकिलः मधौ मधुरं विरौति, तत् चारुचूतकलिकानिकरैकहेतुः** अस्ति । अस्ति इति क्रियापदम् । किं कर्तृ ?-**'तत्'**-पिककूजितम्, तत् कथंभूतम् ?-चारु०[**चारुचूतकलिकानिकरैक**]-हेतुः-रुचिराऽऽम्रमञ्जरी-समूहैककारणम् । चारुश्चासौ चूतश्च-चारुचूतः, तस्य कलिकाः-चारुचूतकलिकाः, चारुचूतकलिकानां निकरः-चारुचूतकलिकानिकरः, एकश्चासौ हेतुश्च-एकहेतुः, चारुचूतकलिकानिकर एव एकहेतुः-चारुचूतकलिकानिकरैकहेतुः ॥६॥

**त्वत्संस्तवेन भवसन्ततिसन्निबद्धं,**
**पापं क्षणात् क्षयमुपैति शरीरभाजाम् ।**
**आक्रान्तलोकमलिनीलमशेषमाशु,**
**सूर्यांशुभिन्नमिव शार्वरमन्धकारम् ॥७॥**

**७-अज्ञातः**—हे नाथ ! **त्वत्संस्तवेन शरीरभाजां पापं क्षणात् क्षयमुपैति**-प्राप्नोति, तव संस्तवः-त्वत्संस्तवः, तेन त्वत्संस्तवेन, शरीरं भजन्ति इति शरीरभाजः, तेषां शरीरभाजाम् किंभूतं पापम् ?-**भवसन्ततिसन्निबद्धम्**-जन्मकोटिसमर्जितम्, भवानां सन्ततिः भवसन्ततिः, भवसन्तत्या सन्निबद्धम्-भवसन्ततिसन्निबद्धम् । दृष्टान्तमाह-**इव** यथा, **शार्वरं अन्धकारं सूर्यांशुभिन्नं** सत् क्षयमुपैति । शर्वर्यां भवं-शार्वरम् । अन्धकारं किंभूतम् ?-**आक्रान्तलोकं**-व्याप्तविश्वम्-इत्यर्थः, आक्रान्तो लोको येन तत् । पुनः किंभूतं ?-**अलिनीलम्**-अलिवत् नीलं, नीलस्यान्धकारयोरै(रस्यै) क्यत्वात्, भ्रमरवत् कृष्णम् । पुनः किंभूतम् ?-**अशेषं** सर्वम्, पुनः किंभूतम् ?-'सूर्यांशुभिन्नम्' सूर्यप्रभाविदारितम्, सूर्यस्य अंशवः सूर्यांशवः, सूर्यांशुभिर्भिन्नम् । कथम् ?-**आशु**-शीघ्रम् ॥७॥

**मत्वेति नाथ ! तव संस्तवनं मयेद-**
**मारभ्यते तनुधियाऽपि तव प्रभावात् ।**
**चेतो हरिष्यति सतां नलिनीदलेषु,**
**मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ॥८॥**

८ **अज्ञातः**—हे नाथ ! **इदं तव संस्तवनं मया आरभ्यते** । मया कथंभूतेन ?-**तनुधिया** स्वल्पमतिना इत्यर्थः । तनुः धीः यस्य सः-तनुधीः, तेन । किं कृत्वा ? **मत्वा** ज्ञात्वा, कथं ?-**इति**, । इति किं ?-**इदं स्तोत्रं सतां चेतः हरिष्यति** । कस्मात् ?-**प्रभावात्**-महिम्नः कस्य ? **तव, ननु** निश्चितं, **उदबिन्दुः, नलिनीदलेषु मुक्ताफलद्युतिमुपैति** । उदकस्य बिन्दुः-उदबिन्दुः, नलिनीनां दलानि-नलिनीदलानि, तेषु-कमलिनीपत्रेषु-इत्यर्थः ॥८॥

**आस्तां तव स्तवनमस्तसमस्तदोषं**
**त्वत्संकथाऽपि जगतां दुरितानि हन्ति ।**
**दूरे सहस्रकिरणः कुरुते प्रभैव**
**पद्माकरेषु जलजानि विकासभाञ्जि ॥९॥**

९ **अज्ञातः**—हे नाथ ! **तव स्तवनं दूरे आस्तां, त्वत्सङ्कथापि जगतां दुरितानि हन्ति** । स्तवनं किंभूतम् ?-**अस्तसमस्तदोषम्** समूलकाषं कषितनिखिलदोषम्, समस्ताश्च ते दोषाश्च समस्तदोषाः, अस्ताः समस्तदोषा येन तत्-अस्तसमस्तदोषम् । दृष्टान्तमाह-**सहस्रकिरणः दूरे** अस्तु, सहस्रं किरणा यस्य सः-सहस्रकिरणः । **प्रभैव पद्माकरेषु जलजानि विकासभाञ्जि कुरुते** । जले जायन्ते इति जलजानि-कमलानि । विकाशं(सं) भजन्त इति-विकासभाञ्जि ॥९॥

**नात्यद्भुतं भुवनभूषण ! भूतनाथ!**
**भूतैर्गुणैर्भुवि भवन्तमभिष्टुवन्तः ।**
**तुल्या भवन्ति भवतो ननु तेन किं वा,**
**भूत्याश्रितं य इह नात्मसमं करोति ॥१०॥**

१० **अज्ञातः**—हे **भुवनभूषण** ! भुवनस्य भूषणं-भुवनभूषणम्, तस्य संबोधनं क्रियते हे भुवनभूषण! हे **भूतनाथ** ! भूतानां नाथो भूतनाथः, तस्य संबोधनं क्रियते, हे प्राणिप्रभो ! । **भूतैः गुणैः भवन्तं अभिष्टुवन्तः भवतस्तुल्या भवन्ति** एतत् **अत्यद्भुतं न** । व्यतिरेकमाह-**ननु** निश्चितम्, **वा** अथवा, **तेन** स्वामिना, **किं** स्यात्, **यः इह** जगति, **आश्रितं आत्मसमं न करोति**-आत्मनः समः-आत्मसमः, तं आत्मसमम् । कया ?-**भूत्या** ऋद्ध्या ॥१०॥

**दृष्ट्वा भवन्तमनिमेषविलोकनीयं,**
**नान्यत्र तोषमुपयाति जनस्य चक्षुः ।**
**पीत्वा पयः शशिकरद्युति दुग्धसिन्धोः,**
**क्षारं जलं जलनिधेरसितुं क इच्छेत् ? ॥११॥**

**११ अज्ञातः**—हे प्रभो ! **जनस्य चक्षुः अन्यत्र तोषं न उपयाति** । किं कृत्वा ?-**दृष्ट्वा** अवलोक्य । कं कर्मतापन्नं ?-**भवन्तम्** त्वाम् इत्यर्थः । भवन्तं कीदृशम् ? **अनिमेषविलोकनीयम्**-न निमेषेण विलोक्यते-दृश्यते इति-अनिमेषविलोकनीयः, तम् अनिमेषविलोकनीयम् । दृष्टान्तमाह-**दुग्धसिन्धोः** क्षीरसमुद्रस्य, **पयः-पीत्वा जलनिधेः क्षारं जलं असितुं क इच्छेत्** ?-अपि तु न कोपि । पयः किंभूतम् ? -**शशिकरद्युति**-शशः अस्य अस्ति इति शशी, शशिनः कराः-शशिकराः, शशिकराः इव द्युतिः यस्य तत्-शशिकरद्युति ॥११॥

**यैः शान्तरागरुचिभिः परमाणुभिस्त्वं,**
**निर्मापितास्त्रिभुवनैकललामभूत ! ।**
**तावन्त एव खलु तेऽप्यणवः पृथिव्यां,**
**यत् ते समानमपरं नहि रूपमस्ति ॥१२॥**

**१२ अज्ञातः**—हे **त्रिभुवनैकललामभूत** ! त्रयाणां भुवनानां समाहारः त्रिभुवनम् । एकं च तत् ललामं च-एकललामं । एकललामं इव-एकललामभूतः त्रिभुवने एकललामभूतः-त्रिभुवनैकललामभूतः, तसं बोधनं क्रियते हे त्रिभुवनैकललामभूत !, **तेऽप्यणवः पृथिव्यां तावन्त एव** वर्त्तन्ते । ते के?-**यैः परमाणुभिः त्वं निर्मापितः**-इति क्रिया-कारकसंटङ्कः । परमाणुभिः कथंभूतैः ?-**शान्तरागरुचिभिः**-शान्तस्य रागस्य रुचिः येषु ते शान्तरागरुचयः, तैः-शान्तरागरुचिभिः ।

**यद्** यस्मात् कारणात्, **हि** निश्चितं, **ते** तव, **समानं** सदृशं, **अपरं** द्वितीयं, **रूपं नास्ति** ॥१२॥

**वक्त्रं क्व ते सुरनरोरगनेत्रहारि,**
**निःशेषनिर्जितजगत्त्रितयोपमानम् ।**
**बिम्बं कलङ्कमलिनं क्व निशाकरस्य,**
**यद् वासरे भवति पाण्डुपलाशकल्पम् ॥१३॥**

**१३ अज्ञातः**—हे नाथ ! **ते** तव, **वक्त्रं क्व** वर्त्तते[१], द्वौ क्वशब्दौ महदन्तरं सूचयतः । तथा

१. 'तथा निशाकरस्य बिम्बं क्व ?-द्वौ क्व शब्दौ महदन्तरं सूचयतः' इति यदि, तर्हि सुष्ठु पाठः ।

**निशाकरस्य बिम्बं क्व** वर्त्तते ? वक्त्रं कथंभूतम् ?-**सुर-नरोरगनेत्रहारि** सुराश्च नराश्च उरगाश्च-सुर-नरोरगाः, सुर-नरोरगाणां नेत्राणि सुर--नरोरगनेत्राणि, सुरनरोरगनेत्राणि हरति इत्येवंशीलं सुरनरोरगनेत्रहारि। पुनःकथंभूतम् ?-**निःशेषनिर्जितजगत्त्रितयोपमानम्**-जगतां त्रितयं-जगत्त्रितयं, जगत्त्रितयस्य उपमानानि-जगत्त्रितयोपमानानि,-निःशेषं निर्जितानि जगत्त्रितयोपमानानि येन तत्-निःशेषनिर्जितजगत्त्रितयोपमानम् निशाकरस्य बिम्बं कीदृशम् ?-**कलङ्कमलिनं**-कलङ्केन मलिनम् कलङ्कमलिनं, **यद्**, चन्द्रबिम्बं, **वासरे पाण्डुपलाशकल्पम् भवति** । पाण्डु च तत् पलाशं च-पाण्डुपलाशं, पाण्डुपलाशेन कल्पं-पाण्डुपलाशकल्पं जीर्ण-पक्व-पाण्डुरवर्णपत्रसदृशम् । भवति इत्यर्थः ॥१३॥

**सम्पूर्णमण्डलशशाङ्ककलाकलाप-**
**शुभ्रा गुणास्त्रिभुवनं तव लङ्घयन्ति ।**
**ये संश्रितास्त्रिजगदीश्वर ! नाथमेकं,**
**कस्तान् निवारयति सञ्चरतो यथेष्टम् ? ॥१४॥**

**१४ अज्ञातः**—हे **त्रिजगदीश्वर**! त्रयाणां जगतां समाहारः-त्रिजगत्, त्रिजगतः ईश्वरः-त्रिजगदीश्वरः, तस्य संबोधनं-हे त्रिजगदीश्वर !, **ये तव गुणाः त्रिभुवनं लङ्घयन्ति** । गुणाः किं विशिष्टाः ?-**संपूर्णमण्डलशशाङ्क-कलाकलापशुभ्राः** संपूर्णं मण्डलं यस्य सः-संपूर्णमण्डलः, शश- अङ्के यस्य सः-शशाङ्कः । संपूर्णमण्डलश्चासौ शशाङ्कश्च-संपूर्णमण्डल-शशाङ्कः । (२) कलानां कलापः-कलाकलापः, संपूर्णमण्डलशशाङ्कस्य कलाकलापः-संपूर्णमण्डलशशाङ्ककलाकलापः, संपूर्ण-मण्डलशशाङ्ककला-कलापवत् शुभ्राः संपूर्णमण्डलशशाङ्ककलाकलाप शुभ्राः । **ये गुणाः एकं नाथं संश्रिताः** । **कः** पुरुषः, **यथेष्टं सञ्चरतः**, **तान् निवारयति**, इत्यन्वयः । इष्टस्यानतिक्रमेण-यथेष्टम् ॥१४॥

**चित्रं किमत्र यदि ते त्रिदशाङ्गनाभिर्-**
**नीतं मनागपि मनो न विकारमार्गम् ।**
**कल्पान्तकालमरुता चलिताचलेन,**
**किं मन्दराद्रिशिखरं चलितं कदाचित् ? ॥१५॥**

**१५ अज्ञातः**—हे नाथ ! **यद ते** तव, **मनः मनागपि त्रिदशाङ्गनाभिः विकारमार्गं न नीतम्**-इत्यन्वयः । न नीतं इति क्रियापदं-काभिः ?-'त्रिदशाङ्गनाभिः'-त्रिदशानाम् अङ्गनाः-त्रिदशाङ्गनाः ।

ताभिः-त्रिदशाङ्गनाभिः, विकारस्य मार्गः विकारमार्गः, तं विकार-मार्गम्। **अत्र किं चित्रं** अस्ति ?-न किमपि-इत्यर्थः। दृष्टान्तमाह-**कदाचित् कल्पान्त-कालमरुता किं मन्दराद्रिशिखरं चलितम्**। कल्पान्त-कालमरुता कथंभूतेन ?-**चलिताऽचलेन,** चलिताः अचलाः येन स-चलिताचलः, तेन। कल्पस्य अन्तः-कल्पान्तः, कल्पान्तश्चासौ कालश्च कल्पान्तकालः, कल्पान्तकालस्य मरुत्-कल्पान्तकालमरुत्, तेन कल्पान्तकालमरुता। मन्दरश्चासौ अद्रिश्च मन्दराद्रिः, मन्दराद्रेः शिखरम्-मन्दराद्रिशिखरम्॥१५॥

**निर्धूमवर्तिरपवर्जिततैलपूरः,**
**कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि।**
**गम्यो न जातु मरुतां चलिताचलानां,**
**दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः॥१६॥**

**१६ अज्ञातः—**हे **नाथ ! त्वं अपरः दीपः अस्ति** यत्, किंविशिष्टः ?-**निर्धूम-वर्त्तिः**-धूमश्च वर्त्तिश्च धूम-वर्त्ती, निर्गते धूम-वर्त्ती यस्मात् सः-निर्धूम-वर्त्तिः। काम-दशाभ्यां रहितः इत्यर्थः। पुनः कथंभूतः ? -**अपवर्जिततैलपूरः**-तैलस्य पूरः तैलपूरः, अपवर्जितः तैलपूरः येन यस्मात् सः-त्यक्तस्नेहप्रकरः। अन्यच्च **कृत्स्नं इदं जगत्त्रयं** प्रकटीकरोषि। अप्रकटंप्रकटं करोषि। अन्यच्च **त्वं जातु** कदाचित्, **मरुतां न गम्यः** न वशः, असि इति शेषः। मरुतां कथंभूतानाम् ?-**चलिताऽचलानाम्** चलिता अचला यैः ते चलिताचलाः, तेषाम् चलिताचलानाम्॥१६॥

**नास्तं कदाचिदुपयासि न राहुगम्यः,**
**स्पष्टीकरोषि सहसा युगपज्जगन्ति।**
**नाम्भोधरोदरनिरुद्धमहाप्रभावः,**
**सूर्यातिशायिमहिमाऽसि मुनीन्द्र ! लोके॥१७॥**

**१७ अज्ञातः—**हे **मुनीन्द्र ! त्वं लोके** सूर्यातिशायिमहिमाऽसि। सूर्यादतिशायी महिमा यस्य सः, सूर्यातिशायिमहिमा यतः **कदाचित् अस्तं न उपयासि। त्वं राहुगम्यो न** असि, राहुना गम्यः-राहुगम्यः। तथा त्वं **सहसा युगपदेव, जगन्ति स्पष्टीकरोषि। नाऽम्भोधरोदरनिरुद्ध-महाप्रभावः** अम्भो धरन्ति-इति अम्भोधराः, अम्भोधराणां उदरं-अम्भोधरोदरम्, (२) महांश्चासौ प्रभावः-महाप्रभावः,-अम्भोधरोदरेण निरुद्धो महाप्रभावो यस्य सः- अम्भोधरोदरनिरुद्धमहाप्रभावः, न असि॥१७॥

**नित्योदयं दलितमोहमहान्धकारं,**
**गम्यं न राहुवदनस्य न वारिदानाम् ।**
**विभ्राजते तव मुखाब्जमनल्पकान्ति,**
**विद्योतयज्जगदपूर्वशशाङ्कबिम्बम् ॥१८॥**

**१८ अज्ञातः**—हे जिनेन्द्र ! **तव मुखाब्जं विभ्राजते** । मुखमेव अब्जं मुखाब्जं, ?- मुखाब्जं किंविशिष्टम् ?-**अपूर्वशशाङ्कबिम्बम्**-शशाऽङ्के सः-शशाङ्कः, शशाङ्कस्य बिम्बं-शशाङ्कबिम्बं, अपूर्वं च तत् शशाङ्कबिम्बं-अपूर्वशशाङ्कबिम्बं । पुनः किं विशिष्टं मुखाब्जम् ?-**नित्योदयं**-नित्यं उदयो यस्य तत् नित्योदयम्। पुनः किं विशिष्टम् ? **दलितमोहमहान्धकारम्**-महत् च तत् अन्धकारम्-महान्धकारम्, मोह एव महान्धकारम्-मोहामहान्धकारम्, दलितं मोहामहान्धकारम् येन तत् दलितमोह-महान्धकारम् पुनः कथंभूतं ?-**गम्यम्** । कथम् ?-**न**, कस्य ?-**राहुवदनस्य**-राहोः वदनम्-राहुवदनम्, तस्य०राहुवदनस्य । पुनः-**वारिदानां न** गम्यम्,-वारि ददति इति वारिदाः, तेषां वारिदानाम्, । पुनः किंभूतम् ?-**अनल्पकान्ति**, न अल्पा अनल्पा कान्तिः यस्य तत्० । मुखाब्जं किं कुर्वत् ?-**विद्योतयत्**-प्रकाशयत्, । किं कर्मतापन्नम् ?-**जगत्** ॥१८॥

**किं शर्वरीषु शशिनाऽह्नि विवस्वता वा?**
**युष्मन्मुखेन्दुदलितेषु तमस्सु नाथ! ।,**
**निष्पन्नशालिवनशालिनि जीवलोके,**
**कार्यं कियज्जलधरैर्जलभारनम्रैः ? ॥१९॥**

**१९ अज्ञातः**—हे नाथ ! **शर्वरीषु शशिना, वा** अथवा, **अह्नि विवस्वता** सूर्येण **किं** कार्यम्, भवति इत्यन्वयः, न किमपि इत्यर्थः । केषु सत्सु ? -**तमस्सु**, तमस्सु कथंभूतेषु ?-**युष्मन्मुखेन्दुदलितेषु**-मुखमेव इन्दुः-मुखेन्दुः, युष्माकं मुखेन्दुः-युष्मन्मुखेन्दुः, युष्मन्मुखेन्दुना दलितानि युष्मन्मुखेन्दुदलितानि, तेषु-युष्मन्मुखेन्दुदलितेषु । अत्र दृष्टान्तमाह-**जीवलोके जलधरैः कियत् कार्यं** स्यात् ? न किमपि इत्यर्थः, जीवलोके कथंभूते ?-**निष्पन्नशालिवनशालिनि** । जलधरैः कथंभूतैः ?-**जलभारनम्रैः** । शालि(ली)नां वनानि शालिवनानि, निष्पन्नानि च तानि शालिवनानि-निष्पन्नशालिवनानि, निष्पन्नशालिवनैः शालते शोभते इत्येवंशीलः-निष्पन्नशालिवनशाली, तस्मिन्-निष्पन्नशालिवनशालिनि । जलस्य भारः जलभारः, जलभारेण नम्राः, तैः ॥१९॥

**ज्ञानं यथा त्वयि विभाति कृतावकाशं,**
**नैवं तथा हरिहरादिषु नायकेषु ।**
**तेजः स्फुरन्मणिषु याति यथा महत्त्वं,**
**नैवं तु काचशकले किरणाकुलेऽपि ॥२०॥**

**२० अज्ञातः**—हे नाथ ! **त्वयि ज्ञानं विभाति** । ज्ञानं किंविशिष्टम् ?-**कृतावकाशम्**-कृतः अवकाशः येन तत् । तथा **हरिहरादिषु नायकेषु न एवं** विभाति । हरिश्च हरश्च-हरि-हरौ, हरि-हरौ आदिः येषां ते-हरि-हरादयः, तेषु । दृष्टान्तोऽत्र-**यथा स्फुरन्मणिषु तेजः महत्वं याति, तु** पुनः, **काचशकले न एवं** महत्वं याति । स्फुरन्तश्च ते मणयश्चस्फुरन्मणयः, तेषु । काचस्य शकलं-काचशकलं, तस्मिन् ॥२०॥

**मन्ये वरं हरिहरादय एव दृष्टा,**
**दृष्टेषु येषु हृदयं त्वयि तोषमेति ।**
**किं वीक्षितेन भवता भुवि येन नान्यः,**
**कश्चिन्मनो हरति नाथ ! भवान्तरेऽपि ॥२१॥**

**२१ अज्ञातः**—हे नाथ ! [1]**ज( य )न्मया हरि-हरादयः एव दृष्टाः**, तद् **वरं मन्ये येषु दृष्टेषु हृदयं त्वयि तोषमेति, भवता वीक्षितेन किं स्यात्**?, येन **अन्यः कश्चिद् भवान्तरेऽपि भुवि मनो न हरति**, एकस्माद् भवादन्यो भवो **भवान्तरं**, तस्मिन्० ॥२१॥

**स्त्रीणां शतानि शतशो जनयन्ति पुत्रान्,**
**नान्या सुतं त्वदुपमं जननी प्रसूता ।**
**सर्वा दिशो दधति भानि सहस्त्ररश्मिं,**
**प्राच्येव दिग् जनयति स्फुरदंशुजालम् ॥२२॥**

**२२ अज्ञातः**—हे नाथ ! **स्त्रीणां शतानि शतशः पुत्रान् जनयन्ति, अन्या जननी त्वदुपमं सूतं न प्रसूता** । तव उपमा यस्य सः-त्वदुपमः, तं त्वदुपमम्, अत्रोपमानम्-**सर्वा दिशः भानि दधति**-धारयन्ति-इत्यर्थः । **प्राच्येव दिग् स्फुरदंशुजालं सहस्त्ररश्मिं जनयति**-प्रसूता इत्यर्थः । सहस्त्रं-**रश्मयो** यस्य सः-सहस्त्ररश्मिः, तं सहस्त्ररश्मिम्, स्फुरन्तश्च ते अंशवः-स्फुरदंशवः, स्फुरदंशूनां जालं यस्य सः, अथवा इव स्फुरदंशु जालः-तम् स्फुरदंशुजालम् ॥२२॥

१. हस्तलिखितप्रतिषु 'य'कारस्य स्थाने केचन लिपिकाराः 'ज'कारं लिखन्ति-इत्येतत् ज्ञापयितुमस्माभिः 'ज'कारः स्वीकृतः, अतः शब्दानां स्वरूपं अर्थं च निर्णीय लिप्यन्तरं कार्यम् ।

**त्वामामनन्ति मुनयः परमं पुमांस-**
**मादित्यवर्णममलं तमसः परस्तात् ।**
**त्वामेव सम्यगुपलभ्य जयन्ति मृत्युं,**
**नान्यः शिवः शिवपदस्य मुनीन्द्र ! पन्थाः ॥२३॥**

**२३ अज्ञातः**—हे **मुनीन्द्र ! मुनयः त्वां परमं पुमांसं आमनन्ति** । त्वां किंभूतम् ?-**अमलम्,** न विद्यते मलो यस्य सः-अमलः, तम्०-अमलम्, पुनःकिंभूतम् ?-**आदित्यवर्णं**-आदित्यस्य इव वर्णो यस्य सः आदित्यवर्णः, तम्०आदित्यवर्णम्, कथं ? **परस्तात्,** कस्य ?-**तमसः** । **त्वामेव सम्यगुपलभ्य** मुनयः **मृत्युं** मृत्युभयं **जयन्ति**-स्फेटयन्ति, त्वत्तः **अन्यः शिवपदस्य शिवः** निरुपद्रवः, **पन्था नाऽस्ति** ॥२३॥

**त्वामव्ययं विभुमचिन्त्यमसङ्ख्यमाद्यं,**
**ब्रह्माणमीश्वरमनन्तमनङ्गकेतुम् ।**
**योगीश्वरं विदितयोगमनेकमेकं,**
**ज्ञानस्वरूपममलं प्रवदन्ति सन्तः ॥२४॥**

**२४ अज्ञातः**—मुनीन्द्र ! **सन्तः त्वां** एवंविधं **प्रवदन्ति,** त्वां किंविशिष्टम् ? -**अव्ययं**-न विद्यते व्ययो यस्य सः,अव्ययः, तं-अव्ययम्-सर्वकालस्थितिकस्वभावम् । पुनः किंविशिष्टम् ?-**अचिन्त्यं**-चिन्तनार्हः-चिन्त्यः । न चिन्त्यः अचिन्त्यः, तम्, आध्यात्मि-कैरपि चिन्तितुमशक्यम्, पुनः किंविशिष्टम् ? - **असङ्ख्यम्**-न विद्यते सङ्ख्या यस्य सः-असङख्यः तम्, [1]सङ्ख्यगुणैः अपरिमितम्-इत्यर्थः । पुनः-**आद्यं,** पुनः, **ब्रह्माणं, बृंहति**-अनन्तानन्देन वर्धते इति-ब्रह्मा, तम्० । पुनः **ईश्वरं** नाथं इत्यर्थः । पुनः **अनन्तं,** न विद्यते अन्तो यस्य स-अनन्तः, तम्-मृत्युरहितम् इत्यर्थः । पुनः-**अनङ्गकेतुं**-आमनन्ति, अनङ्गे केतुः-अनङ्गकेतुः, तम्-कामनाशनम् इत्यर्थः । पुनः-**योगीश्वरं,** पुनः-**विदितयोगं**-विदितो योगो येन स०विदितयोगः, तम् । पुनः-**अनेकम्**-न एकोऽनेकः, तं-अनेकम्, ज्ञानेन सर्वगत्वात्, पुनः-**एकम्**-एकजीवद्रव्याद्यपेक्षया । पुनः-**ज्ञानस्वरूपं** ज्ञानमेव स्वरूपं यस्य स ज्ञानस्वरूपः, तम् क्षायिककेवलज्ञानमयम् पुनः-**अमलम्** न विद्यते मलः यत्र सः-अमलः, तम्० ॥२४॥

**बुद्धस्त्वमेव विबुधार्चितबुद्धिबोधात्**
**त्वं शङ्करोऽसि भुवनत्रयशङ्करत्वात् ।**

१. [अ]संख्यं, गुणै...इति यदि स्यात्, तर्हि साधुः ।

**धाताऽसि धीर ! शिवमार्गविधेर्विधानाद्**
**व्यक्तं त्वमेव भगवन् ! पुरुषोत्तमोऽसि ॥२५॥**

**२५ अज्ञातः—**हे **विबुधार्चित** ! विबुधैरर्चितः-विबुधार्चितः, तत्संबोधनम्-हे विबुधार्चित ! **त्वमेव बुद्धः** असि, कस्मात् ?-**बुद्धिबोधात्** मतिप्रकाशात्-इत्यर्थः । बुद्धेः बोधः-बुद्धिबोधः, तस्मात् । **त्वं शङ्करोऽसि,** कस्मात् ?-**भुवनत्रयशङ्करत्वात्**-भुवनानां त्रयं भुवनत्रयं, शं करोति इति शङ्करः, शङ्करस्य भावः-शङ्करत्वम्, भुवनत्रयस्य शङ्करत्वं-भुवनत्रयशङ्करत्वं, तस्मात्० । हे **धीर ! त्वं धाताऽसि,** कस्मात् ?-**विधानात्,** कस्य ?-**शिवमार्गविधेः,** हे **भगवन् ! व्यक्तं त्वमेव पुरुषोत्तमः** असि, पुरुषेषु उत्तमःपुरुषोत्तमः ॥२५॥

**तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ!,**
**तुभ्यं नमः क्षितितलामलभूषणाय ।**
**तुभ्यं नमस्त्रिजगतः परमेश्वराय,**
**तुभ्यं नमो जिन ! भवोदधिशोषणाय ॥२६॥**

**२६ अज्ञातः—**हे **नाथ ! तुभ्यं नमः** अस्तु । तुभ्यं किंभूताय ? **त्रिभुवनार्त्तिहराय**-त्रयाणां भुवनानां समाहारः-त्रिभुवनं, त्रिभुवनस्य अर्त्तिः त्रिभुवनार्त्तिः, त्रिभुवनार्त्तेः [1]हरः-त्रिभुवनार्त्तिहरः, तस्मै त्रिभुवनार्त्ति-हराय । पुनः **तुभ्यं नमः** अस्तु-तुभ्यं किंभूताय ?-**क्षितितलाऽमल-भूषणाय** क्षितितलस्य [2]अमलभूषणाय इति क्षितितला-मलभूषणाय । पुनः **तुभ्यं नमः** अस्तु, तुभ्यं किंलक्षणाय ?-**परमेश्वराय** परमश्चासौ ईश्वरश्च-परमेश्वरः, तस्मै परमैश्वराय, कस्य ?-**त्रिजगतः** त्रयाणां जगतां समाहारः-त्रिजगत्, तस्य पुनः-हे **जिन ! तुभ्यं नमः** ? तुभ्यं किं-लक्षणाय ?-**भवोदधिशोषणाय,** भव एव उदधिः-भवोदधिः, भवोदधेः शोषणं णः-शोषयति इति शोषणः-भवोदधिशोषणः, तस्मै भवोदधि-शोषणाय, ॥२६॥

**को विस्मयोऽत्र यदि नाम गुणैरशेषै-**
**स्त्वं संश्रितो निरवकाशतया मुनीश ! ।**
**दोषैरुपात्तविविधाश्रयजातगर्वैः,**
**स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ॥२७॥**

**२७ अज्ञातः—**हे **मुनीश** ! **नाम** इति कोमलामन्त्रणे, सः, **निरवकाशतया**-सर्वाङ्गव्यापकतया

१. हरति इति हरः, [हृ+अच्], 'अच्' [सि.हे.५. १.४९], तथा कर्मणि कृतः [सि.हे. २.२.८३] २. क्षितेः तलम्-क्षितितलम्, अमलं भूषणम्-अमलभूषणम् । इति प्रथमं समासः कार्यः ।

इत्यर्थः। **अशेषैः गुणैः त्वं संश्रितः** इत्यन्वयः, **अत्र को विस्मयः**-किमाश्चर्यमित्यर्थः। निर्गतः अवकाशः यस्मात् स निरवकाशः, निरवकाशस्य भावः-निरवकाशता, तया । अन्यच्च-**दोषैः स्वप्नान्तरेऽपि कदाचिदपि न ईक्षितोऽसि** । दोषैः किंलक्षणैः ?-**विविधाश्रयजातगर्वैः**-प्राप्तनानाश्रयोत्पन्नगर्वैः इत्यर्थः । विविधाश्च ते आश्रयाः-विविधाश्रयाः, उपात्ताश्च ते विविधाश्रयाश्च उपात्तविविधाश्रयाः, उपात्तविविधाश्रयैः जातः गर्वः येषां ते उपात्तविविधाश्रयजातगर्वाः, तैः उपात्तविविधाश्रयजातगर्वैः । एकस्मात् स्वप्नात् अन्यः स्वप्नः-स्वप्नान्तरम्, तस्मिन् स्वप्नान्तरे॥२७॥

**उच्चैरशोकतरुसंश्रितमुन्मयूख-**
**माभाति रूपममलं भवतो नितान्तम् ।**
**स्पष्टोल्लसत्किरणमस्ततमोवितानं,**
**बिम्बं रवेरिव पयोधरपार्श्ववर्ति ॥२८॥**

२८ **अज्ञातः**—हे नाथ ! **भवतः** तव **रूपमाभाति,** कथं ?-**उच्चैः,** रूपं किंलक्षणं ?-**अशोकतरुसंश्रितम्**-न विद्यते शोको यस्य-अशोकः, अशोकश्चासौ तरुश्च अशोकतरुः, अशोकतरौ संश्रितम्-अशोक-तरुसंश्रितम्, पुनः किंस्वरूपम् रूपम् ?-**उन्मयूखम्**- उल्लसन्तो मयूखाः यस्य तत्-उन्मयूखम्। पुनः-**अमलम्**-न विद्यते मलो यत्र तद् अमलम् कथम् ?-**नितान्तम्** निरन्तरम्। दृष्टान्तमाह-**इव** यथा, रवेः **बिम्बमाभाति,** । बिम्बं किं लक्षणम् ?-**पयोधरपार्श्ववर्त्ति**-पयो धरति इति पयोधरः, पयोधरस्य पार्श्वं-पयोधरपार्श्वम्, पयोधरपार्श्वे वर्त्तते इत्येवंशीलं-पयोधरपार्श्ववर्त्ति । पुनः **नितान्तम्** निरन्तरम्। दृष्टान्तमाह-**इव** यथा, रवेः **बिम्बमाभाति,** । बिम्बं किं लक्षणम् ?-**पयोधरपार्श्ववर्त्ति**-पयो धरति इति पयोधरः, पयोधरस्य पार्श्वं-पयोधरपार्श्वम्, पयोधरपार्श्वे वर्त्तते इत्येवंशीलं-पयोधरपार्श्ववर्त्ति । पुनः किंलक्षणम् ?-**स्पष्टोल्लसत्किरणम्**-उल्लसन्तश्च ते किरणाश्च उल्लसत्-किरणाः, स्पष्टा उल्लसत्किरणाः यस्मिन् तत्, स्पष्टोल्लसत्किरणम्। पुनः किंलक्षणं बिम्बं ? -**अस्ततमोवितानम्**-तमसां वितानम्-तमोवितानम् अस्तं तमोवितानं येन तद्-अस्ततमोवितानम्॥२८॥

**सिंहासने मणिमयूखशिखाविचित्रे,**
**विभ्राजते तव वपुः कनकावदातम्।**
**बिम्बं वियद्विलसदंशुलतावितानं,**
**तुङ्गोदयाद्रिशिरसीव सहस्ररश्मेः ॥२९॥**

**२९ अज्ञातः**—हे नाथ ! **तव वपुः विभ्राजते** । वपुः किंलक्षणम् ?-**कनकावदातम्**-कनकवद् अतिगौरम् इत्यर्थः । कस्मिन् विभ्राजते ?-**सिंहासने** । सिंहासने किंविशिष्टे ?-**मणिमयूखशिखाविचित्रे**-रत्नकान्ति-चूडाचारुणि । मणीनां मयूखाः मणिमयूखाः, मणि-मयूखानां शिखाः म०[मणिमयूख]शिखाः, मणिमयूखशिखाभिः विचित्रं-मणि-मयूख-शिखाविचित्रम्, तस्मिन् । दृष्टान्तमाह-**इव** यथा, **सहस्ररश्मेः बिम्बं**-विभ्राजते । सहस्रं रश्मयो यस्य सः-सहस्ररश्मिः, तस्य सहस्ररश्मेः । कस्मिन् ?-**तुङ्गोदयाद्रिशिरसि**-तुङ्गश्चासौ उदयाद्रिश्च-तुङ्गोदयाद्रिः, तुङ्गोदयाद्रेः शिरः-तुङ्गोदयाद्रिशिरः, तस्मिन् तुङ्गोदयाद्रिशिरसि, बिम्बं कथंभूतम् ?-**वियद्विल-सदंशुलतावितानम्**— व्योम्नि-द्योतमानांशुलताविस्ताराग्रमित्यर्थः । विलसन्तश्च ते अंशवश्च विलसदंशवः, वियति विलसदंशवः,-वियद्विलसदंशवः, लतानां वितानं-लतावितानम्, वियद् विलसदंशूनां लतावितानं यस्य तद् वियद्विलस-दंशुलतावितानम् ।।२९।।

**कुन्दावदातचलचामरचारुशोभं,**
**विभ्राजते तव वपुः कलधौतकान्तम् ।**
**उद्यच्छशाङ्कशुचिनिर्झरवारिधार-**
**मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ।।३०।।**

**३० अज्ञातः**—हे नाथ ! **तव वपुः विभ्राजते** । किंलक्षणं वपुः ?-**कलधौत-कान्तम्** ०वपुः किंभूतम् ?-कुन्दावदातचलचामर-चारुशोभम्-चलानि च तानि चामराणि-च चलचामराणि । कुन्द-वदवदातानि-कुन्दावदातानि-कुन्दावदातानि च तानि चल-चामराणि च-कुन्दादात-चलचामराणि, कुन्दावदात-चलचामरैः चार्वी शोभा यस्य तत्-कुन्दावदात-चलचामरचारुशोभम् । दृष्टान्तमाह-**इव** यथा, **सुरगिरेः शातकौम्भं तटं विभ्राजते,** कथं ?-**उच्चैः** । शातकुम्भस्य इदं-शातकौम्भं सुवर्णतटम् इत्यर्थः । पुनः किंलक्षणं तटम् ?-**उद्यच्छशाङ्क-शुचिनिर्झरवारिधारम्** । निर्झराणां वारिणि-निर्झरवारिणि । निर्झरवारीणां धाराः-निर्झरवारिधाराः, शशः अङ्के यस्य सः-शशाङ्कः, उद्यंश्चासौ शशाङ्कश्च-उद्यच्छशाङ्कः । उद्यच्छशाङ्कवत् शुचयो निर्झरवारिधाराः यत्र तत्, उद्यच्छशाङ्कशुचिनिर्झरवारि धारम् ।।३०।।

**छत्रत्रयं तव विभाति शशाङ्ककान्त-**
**मुच्चैः स्थितं स्थगितभानुकरप्रतापम् ।**

**मुक्ताफलप्रकरजालविवृद्धशोभं**
**प्रख्यापयत् त्रिजगतः परमेश्वरत्वम् ॥३१॥**

**३१ अज्ञातः**—हे नाथ ! **तव छत्रत्रयं विभाति ।** छत्राणां-त्रयं-छत्रत्रयं, छत्रत्रयं किंलक्षणम् ?-**शशाङ्ककान्तम्**-शशाङ्कवत् कान्तम् । पुनः०-**स्थितम्,** कथम् ?-**उच्चैः**-मूर्ध्नि स्थितम्-इत्यर्थः । पुनः-**स्थगित०भानुकर-प्रतापम्** ।-भानोः कराः भानुकराः, भानुकराणां प्रतापः, भानुकरप्रतापः । स्थगितः भानुकरप्रतापः येन तत् स्थगित-भानुकरप्रतापम्, पुनः किं०भूतम् ?-**मुक्ता०फलप्रकरजालविवृद्धशोभम्**-मुक्ताफलानां प्रकरः-मुक्ता-फलप्रकरः, मुक्ताफलप्रकरस्य जालं-मुक्ताफल-प्रकरजालं, मुक्ताफल-प्रकरजालेन विवृद्धा शोभा यस्य तत्-मुक्ताफल-प्रकरजालविवृद्धशोभम् छत्रत्रयं किं कुर्वत् ?-**प्रख्यापयत्**-प्रकटयत्, किंकर्मतापन्नम् ?-**परमेश्वरत्वम्,** कस्य ?-**त्रिजगतः** ॥३१॥

**उन्निद्रहेमनवपङ्कजपुञ्जकान्ति-**
**पर्युल्लसन्नखमयूखशिखाभिरामौ ।**
**पादौ पदानि तव यत्र जिनेन्द्र ! धत्तः,**
**पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥३२॥**

**३२ अज्ञातः**—हे **जिनेन्द्र ! तव पादौ यत्र पदानि धत्तः** । पादौ-किंलक्षणौ? **उन्नि०[द्र हेम-नव-पङ्कजपुञ्जकान्तिपर्युल्लसन्नखमयूख-शिखाभि] रामौ०** (१) [1]नवानि च तानि पङ्कजानि च-नव-पङ्कजानि,हेम्नः नवपङ्कजानि-हेमनवपङ्कजानि । उन्निद्राणि च तानि हेम-नव- पङ्कजानि-उन्निद्र-हेमनव-पङ्कजानि, उन्निद्र-हेम-नव-पङ्कजानां पुञ्जः उन्निद्र-हेम-नव-पङ्कजपुञ्जः, उन्निद्र-हेम-नव-पङ्कजपुञ्जस्य कान्तिः-उन्निद्र-हेम-नव-पङ्कजपुञ्जकांतिः (२) नखानां मयूखाः-नखमयूखाः, नखमयूखानां शिखाः-नख०-मयूखशिखाः, पर्युल्लसन्त्यश्च ताः-नखमयूखशिखाश्च-पर्युल्ल-सन्नखमयूखशिखाः । (३) उन्निद्रहेम-नव-पङ्कजपुञ्जकान्त्या पर्युल्लसन्नखमयूखशिखाः-उन्निद्र-हेम-नव-पङ्कज-पुञ्जकान्ति-पर्युल्लसन्नखमयूख शिखाः, ।

उन्निद्र-हेम-नव-पङ्कजपुञ्जकान्तिपर्युल्लसन्नखमयूखशिखाभिः अभिरामौ उन्निद्र-हेम-नव-पङ्कजपुञ्जकान्ति-पर्युल्लसन्नखमयूखशिखाऽभिरामौ । तत्र विबुधाः पद्मानि परिकल्पयन्ति-

१. अत्र नव शब्दस्य सङ्ख्यार्थकत्वात् नव च तानि पङ्कजानि इत्यपि स्यात् ।

निर्मापयन्ति इत्यर्थः ॥३२॥

**इत्थं यथा तव विभूतिरभूज्जिनेन्द्र !**
**धर्मोपदेशनविधौ न तथा परस्य ।**
**यादृक् प्रभा दिनकृतः प्रहतान्धकारा,**
**तादृक् कुतो ग्रहगणस्य विकाशिनोऽपि ? ॥३३॥**

**३३ अज्ञातः—**हे **जिनेन्द्र ! इत्थं** अमुना, प्रकारेण, **धर्मोपदेशनविधौ यथा तव विभूतिः अभूत्।** धर्मस्य उपदेशनं धर्मोपदेशनं, धर्मोपदेशनस्य विधिः धर्मोपदेशन विधिः, तस्मिन्। तथा **परस्य** अपरस्य न अभूत्। दृष्टान्तः अत्र-**दिनकृतः यादृक् प्रभा वर्तते, विकाशिनोपि ग्रहगणस्य तादृक्** प्रभा **कुतः**-भवति इत्यर्थः इत्यन्वयः । दिनं करोति इति दिनकृत्-तस्य दिनकृतः । प्रहतं अन्धकारं यथा यस्याः सा प्रहतान्धकारा, विकाशः अस्य अस्ति इति विकाशी, तस्य विकाशिनः, ग्रहाणां गणः ग्रहगणः, तस्य ॥३३॥

**श्च्योतन्मदाविलविलोलकपोलमूल-**
**मत्तभ्रमद्भ्रमरनादविवृद्धकोपम् ।**
**ऐरावताभमिभमुद्धतमापतन्तं,**
**दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥३४॥**

**३४ अज्ञातः—**हे नाथ ! **भवदाश्रितानां** पुंसां, **भयं नो भवति।** भवन्तं आश्रिताः भवदाश्रिताः, तेषां भवदाश्रितानाम् । किं कृत्वा ? **दृष्ट्वा,** कं कर्मतापन्नम् ?-**इभं,** किंभूतमिभम् ?-**ऐरावताऽऽभम्,** ऐरावतस्य आभा यस्य सः-ऐरावताभः० तम्। पुनः किंलक्षणमिभम् ?-**उद्धतम्** अविनीतम्। इभं किं कुर्वन्तम् ?-**आपतन्तम्**-सन्मुखमागच्छन्तम्, पुनः किंविशिष्टम् ?-**श्च्योतन्मदाविल-विलोल-कपोल-मूलमत्त-भ्रमद्-भ्रमरनादविवृद्ध-कोपम्** श्च्योतंश्चासौ मदश्च-श्च्योतन्मदः, श्च्योतन्मदेन आविलाश्च-श्च्योतन्मदाविलाः कपोलयोः मूले-कपोलमूले, विलोले कपोलमूले-विलोलकपोलमूले-विलोल-कपोलमूलयोः मत्ताः-विलोल-कपोलमूलमत्ताः भ्रमन्तश्च ते भ्रमराः-भ्रमद्-भ्रमराः विलोल-कपोलमूलमत्ताश्च ते भ्रमद्-भ्रमराश्च विलोल-कपोलमूलमत्त-भ्रमद्-भ्रमराः । श्च्योतन्मदाविलाश्च ते विलोलकपोलमूलमत्त-भ्रमद्-भ्रमराश्च-श्च्योतन्मदाविल-विलोल--कपोलमूलमत्त-भ्रमद्-भ्रमराः, श्च्योतन्मदाविल-विलोल-कपोलमूलमत्त-भ्रमद्भ्रमराणां नादः-श्च्यो-तन्मदाविल-विलोल-कपोलमूलमत्त-भ्रमद्-भ्रमरनादः श्च्योतन्ममदाविलविलोल-कपोलमूलमत्त-भ्रमद्भ्रमरनादेन विवृद्धः

कोपः यस्य सः-श्च्योतमदाविल-विलोल-कपोलमूलमत्त-भ्रमद्-भ्रमरनाद विवृद्धकोपः, तम् ॥३४॥

**भिन्नेभकुम्भगलदुज्ज्वलशोणिताक्त-**
**मुक्ताफलप्रकरभूषितभूमिभागः ।**
**बद्धक्रमः क्रमगतं हरिणाधिपोऽपि**
**नाक्रामति क्रमयुगाचलसंश्रितं ते ॥३५॥**

**३५ अज्ञातः**—हे नाथ ! **हरिणाधिपोऽपि, ते** तव, **क्रमयुगाचल-संश्रितं** पुरुषं न आक्रामति-इत्यन्वयः, न हन्तुं धावति इत्यर्थः । किंभूतं पुरुषम् ?-**क्रमयुगाचलसंश्रितं**-क्रमयोः युगं-क्रमयुगं, क्रमयुगमेव अचलः क्रमयुगाचलः, तं क्रमयुगाचलं, क्रमयुगाचलं संश्रितः-क्रमयुगाचलसंश्रितः, तम्, पुनः किंभूतः हरिणाधिपः-**बद्धक्रमः**-बद्धः कीलितः, क्रमः पराक्रमः यस्य सः-बद्धक्रमः, पुनः किंविशिष्टः ?-**भिन्नेभ-कुम्भगल-दुज्ज्वल-शोणिता-ऽऽक्त-मुक्ताफलप्रकरभूषितभूमि-भागः** भिन्नहस्तिशिरः पिण्डाभ्यां गलता पतता उज्ज्वलेन श्वेतवर्णेनः शोणिताक्तेन-रुधिर-खरण्टितेन, मुक्ताफलप्रकरेण-मौक्तिकसमूहेन-भूषितो भूमिभागो येन स भिन्न-श्चासौ इभश्च भिन्नेभः, भिन्नेभस्य कुम्भौ-भिन्नेभकुम्भौ उज्ज्वलं च तत् शोणितं च-उज्ज्वलशोणितम्, गलत्[1] च तत् उज्ज्वलशोणितं च-गलदुज्ज्वलशोणितम् । भिन्नेभ-कुम्भगलदुज्ज्वलशोणिताक्तः । मुक्ताफलानां प्रकरः मुक्ता-फलप्रकरः, भिन्नेभकुम्भगलदुज्ज्वलशोणिताक्तश्चासौ मुक्ताफल-प्रकरश्च-भिन्नेभकुम्भगल-दुज्जवल-शोणिताक्त-मुक्ताफल प्रकरः, भूमेः भागः-भूमिभागः । भिन्नेभ-कुम्भगलदुज्ज्वल-शोणिताक्तमुक्ताफलप्रकरेण भूषितः भूमिभागः येन सः-भिन्नेभ-कुम्भगलदुज्ज्वल-शोणिताक्त-मुक्ताफल-प्रकरभूषितभूमि भागः ॥३५॥

**कल्पान्तकालपवनोद्धतवह्निकल्पं,**
**दावानलं ज्वलितमुज्ज्वलमुत्स्फुलिङ्गम् ।**
**विश्वं जिघत्सुमिव सम्मुखमापतन्तं,**
**त्वन्नामकीर्तनजलं शमयत्यशेषम् ॥३६॥**

**३६ अज्ञातः**—हे नाथ ! **त्वन्नामकीर्त्तनजलं अशेषं दावानलं शमयति** इत्यन्वयः । तव नाम-त्वन्नाम, त्वन्नाम्नः कीर्त्तनम्-त्वन्नामकीर्त्तनम्, त्वन्नामकीर्त्तनं जलं-त्वन्नाम-कीर्त्तनजलम् । न विद्यते

---

१. पूर्वं 'गलता उज्ज्वलेन शोणिताक्तेन' इति भिन्नप्रयोगेण मुक्ताफलप्रकरस्य विशेषणत्वमुक्तम्, अधुना तु गलत्त्वं उज्ज्वलत्वं तु शोणितस्येति नोचितम् । वास्तवं तु पूर्ववत् मुक्ताफलप्रकरस्यैव गलत्त्वं-उज्ज्वलत्वं चोचितम्-संपादकः ।

शेषः यत्र सः-अशेषः, तं अशेषम्-दावस्य अनलः-दावानलः, तम् । किंभूतं दावानलम् ?- **कल्पान्तकाल-पवनोद्धनवह्निकल्पम्**-कल्पान्तश्चासौ कालश्च कल्पान्त-कालः, कल्पान्तकालस्य पवनः-कल्पान्तकालपवनः, कल्पान्तकाल-पवनेन उद्धतः उत्कटः-कल्पान्तकाल-पवनोद्धतः, कल्पान्तकाल-पवनोद्तःश्चासौ वह्निश्च-कल्पान्तकालपवनोद्धतवह्निः,कल्पान्तकालपवनोद्धतवह्नेः कल्पः-तुल्यः-कल्पान्तकालपवनोद्धत-वह्निकल्पः, तम् । पुनः किंभूतम् ? **ज्वलितं** प्रदीप्तम् । पुनः किंभूतम् ?-**उज्ज्वलं**-रक्तम् । पुनः किंभूतम् ?-**उत्स्फुलिङ्गम्**-उल्लसद्-वह्निकणम्, उत् उद्र्ध्वं स्फुलिङ्गाः यस्य सः-उत्स्फुलिङ्गः, तम् । दावानलं किंकुर्वन्तम् ?-**आपतन्तम्**-आगच्छन्तम्, कथम् ? -**सन्मुखं । इव** उत्प्रेक्षते, **विश्वं जिघत्सुम् इव** ग्रसितुम् इव ॥३६॥

**रक्तेक्षणं समदकोकिलकण्ठनीलं,**
**क्रोधोद्धतं फणिनमुत्फणमापतन्तम् ।**
**आक्रामति क्रमयुगेन निरस्तशङ्कस्-**
**त्वन्नामनागदमनी हृदि यस्य पुंसः ॥३७॥**

**३७ अज्ञातः**—हे नाथ ! **यस्य पुंसः हृदि त्वन्नामनागदमनी** वर्तते इत्यन्वयः । त्वन्नाम एव नागदमनी-त्वन्नामनागदमनी । स पुमान् **निरस्तशङ्कः क्रमयुगेन फणिनम् आक्रमति** । निरस्ता शङ्का येन सः । क्रमयोः युगं क्रमयुगं तेन । फणाः विद्यन्ते यस्य स फणी, तम् । किंभूतम् फणिनम् ?- **रक्तेक्षणम्**-रक्ते ईक्षणे लोचने यस्य सःरक्तेक्षणः, तम् । पुनःकिंभूतम् ? **समदकोकिलकण्ठनीलम्**- कोकिलस्य कण्ठः-कोकिल-कण्ठः सह वर्त्तते मदेन यः समदः, समदश्चासौ कोकिलकण्ठश्च- [1]समदकोकिलकण्ठः, समदकोकिलकण्ठवत् नीलः-समदकोकिलकण्ठ नीलः, तम् । पुनः किंभूतम्- **क्रोधोद्धतम्**-क्रोधेन उद्धतः उत्कटः क्रोधोद्धतः तम् । पुनः किंभूतम् ?-**उत्फणं**-उद्यन् फणः यस्य सः-उद्यत्फणी, तम्, किं कुर्वन्तम् ?-**आपतन्तम्**-सन्मुखं धावन्तम्, ॥३७॥

**वल्गत्तुरङ्ग-गजगर्जितभीमनाद-**
**माजौ बलं बलवतामपि भूपतीनाम् ।**
**उद्यद्दिवाकरमयूखशिखापविद्धं,**
**त्वत्कीर्तनात् तम इवाशु भिदामुपैति ॥३८॥**

१. समदः कोकिलः-समदकोकिलः, समदकोकिलस्य कण्ठः-इति प्रतौ केनापि विदुषा कृतं टिप्पनकम् ।

**३८ अज्ञातः**-हे नाथ ! **त्वत्कीर्तनात् आजौ बलवतामपि भूपतीनां बलं भिदां उपैति**-इत्यन्वयः । तव कीर्तनम्-त्वत्कीर्त्तनम्, तस्मात् । बलं विद्यते येषां बलवन्तः, तेषां बलवताम् । किंभूतं बलं ? वल्गत्तुरङ्ग गज-गर्जितभीम-नादम्, तुरङ्गाश्च गजाश्च तुरङ्ग-गजाः वल्गन्तश्च ते तुरङ्ग-गजाश्च-वल्गत्तुरङ्ग-गजाः। वल्गत्तुरङ्ग-गजानां गर्जितानि-वल्गत्तुरङ्गगज गर्जितानि, भीमाश्च ते नादाश्च-भीमनादाः, वल्गत्-तुरङ्ग-गजगर्जितैः भीमः नादः यत्र तत्-वल्गत्तुरङ्ग-गजगर्जित-भीमनादम् । दृष्टान्तमाह-**इव** यथा, **तमः** अन्धकारं, भिदां उपैति भेदं गच्छति-इत्यर्थः । तमः किंभूतं ?-**उद्यद्दिवाकरमयूख-शिखाऽपविद्धम्**-उद्गच्छद्रविकराग्राऽपरिच्छंन्नं । दिवाकरोति इति दिवाकरः, उद्यंश्चासौ दिवाकरश्च-उद्यद्दिवाकरः, उद्यद्दिवाकरस्य मयूखाः-उद्यद्दिवाकरमयूखाः, उद्यद्दिवाकरमयूखानां शिखाः-उद्द्यद्दिवाकर-मयूखशिखाः-उद्यद्दिवाकर-मयूखशिखाभिः अपविद्धम् उद्यद्दिवाकर-मयूखशिखापविद्धम् ॥३८॥

**कुन्ताग्रभिन्नगजशोणितवारिवाह-**
**वेगावतारतरणातुरयोधभीमे ।**
**युद्धे जयं विजितदुर्जयजेयपक्षास्-**
**त्वत्पादपङ्कजवनाश्रयिणो लभन्ते ॥३९॥**

**३९ अज्ञातः**—हे नाथ ! **त्वत्पादपङ्कजवनाऽऽश्रयिणो** जनाः **युद्धे जयं लभन्ते**-इत्यन्वयः । तव पादौ-त्वत्पादौ, पङ्के जायन्ते स्म इति पङ्कजानि, पङ्कजानां वनानि[वनं] पङ्कजवनम्, त्वत्पादौ एव पङ्कजवनम्,-त्वत्पादपङ्कजवनम् । त्वत्पादपङ्कजवनम् आश्रयन्ते इत्येवंशीलाः त्वत्पादपङ्कजवनाऽऽश्रयिणः । जनाः किंभूताः ?-**विजित-दुर्जयजेयपक्षाः** निर्जितोत्कटवैरिगणाः-जेतुं योग्याः-जेयाः, जेयानां पक्षः-जेयपक्षः, [1]**दुःखेन** जयः यस्य सः-दुर्जयः । दुर्जयश्चासौ जेयपक्षः-दुर्जयजेयपक्षः, विजितः दुर्जयजेयपक्षः यैः ते विजितदुर्जय-जेयपक्षाः । ०युद्धे किंभूते ?-**कुन्ताग्र०[भिन्नगजशोणितवारिवाहवेगावतारतरणा-तुरयोधभीमे**-भल्लाग्रे[ग्रैः] पाटितानां वारणानां रुधिरजलप्रवाहः, तस्मिन् वेगावतारात् त्वरितप्रवेशनात् तरणे आतुरैः सुभटैः भीमं, तस्मिन् । कुन्तानां अग्राणि-कुन्ताग्राणि, कुन्ताग्रैः भिन्नाः-कुन्ताग्रभिन्नाः, कुन्ताग्रभिन्नाश्च ते गजाः-कुन्ताग्रभिन्नगजाः, कुन्ताग्रभिन्नगजानां शोणितं-कुन्ताग्रभिन्न-गजशोणितम्, वारिणः-वाहः-वारिवाहः, कुन्ता-

टिप्पनकम् : १. "दुःखेन जीयते असौ" इति टीकान्तरेषु

ग्रभिन्नगजशोणितं एव वारिवाहः-कुन्ताग्रभिन्नगजशोणितवारिवाहः, वेगेन अवतारः वेगावतारः, कुन्ताग्रभिन्नगजशोणितवारिवाहवेगावतारः । तरणे आतुराः-तरणातुराः, कुन्ताग्रभिन्नगजशोणित-वारिवाहवेगावतारतरणातुराः, कुन्ताग्रभिन्नगजशोणितवारिवाहवेगावतारतरणातुराश्च ते योधाः-कुन्ता-ग्रभिन्नगजशोणितवारिवाहवेगावतारतुरणातुर योधाः । कुन्ताग्रभिन्न-गजशोणितवारिवाहवेगावतार-तरणातुरयोधैः भीमम्-कुन्ताग्रभिन्न-गजशोणितवारिवाहवेगावतारतरणातुरयोधभीमम्, तस्मिन्।।३९।।

**अम्भोनिधौ क्षुभितभीषणनक्रचक्र-**
**पाठीनपीठभयदोल्बणवाडवाग्नौ ।**
**रगत्तरङ्गशिखरस्थितयानपात्रास्-**
**त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ।।४०।।**

**४० अज्ञातः**—हे नाथ ! **अम्भोनिधौ** सांयात्रिकाः जनाः **भवतः स्मरणाद्, त्रासं** आकस्मिकं भयं विहाय **व्रजन्ति** क्रमेण स्वस्थानं गच्छन्ति-इत्यर्थः । अम्भसां निधिः-अम्भोनिधिः, तस्मिन् । जनाः किंलक्षणाः ?-**रङ्गत्तरङ्गशिखरस्थितयानपात्राः** -उच्छलत्कल्लोलाग्रवर्त्तिवाहना[१] इत्यर्थः । रङ्गन्तश्च ते तरङ्गाः-रङ्गत्तरङ्गाः, रङ्गत्तरङ्गाणां शिखराणि गरङ्गत्तरङ्गशिखराणि, रङ्गत्तरङ्गशिखरेषु स्थितानि यानपात्राणि येषां ते-रङ्गत्तरङ्गशिखरस्थितयानपात्राः, अम्भोनिधौ कथंभूते ?-**क्षुभित भीषण-नक्रचक्र-पाठीन-पीठ-भयदोल्बण वाडवाग्नौ** ।।४०।।

**उद्भूतभीषणजलोदरभारभुग्नाः**
**शोच्यां दशामुपगताश्च्युतजीविताशाः ।**
**त्वत्पादपङ्कजरजोऽमृतदिग्धदेहा**
**मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ।।४१।।**

**४१ अज्ञातः**—हे विभो ! **त्वत्पादपङ्कजरजोमृतदिग्धदेहाः मर्त्याः मकरध्वज-तुल्यरूपाः भवन्ति** । तव पादौ-त्वत्पादौ, पङ्के जायन्ते[ते] इति पङ्कजम्, त्वत्पादौ एव पङ्कजम्-त्वत्पादपङ्कजम् त्वत्पादपङ्कजस्य रजः-त्वत्पादपङ्कजरजः, त्वत्पाद-पङ्करज एव अमृतम्-त्वत्पादपङ्कज-रजोऽमृतम्, त्वत्पादपङ्कजरजोऽमृतेन दिग्धं लिप्तं देहं येषां ते-त्वत्पाद-पङ्कजरजोऽमृतदिग्धा देहाः । मकरो ध्वजे यस्य स मकरध्वजः, मकरध्वजस्य तुल्यं रूपं येषां ते-

१. 'देश्योऽयं शब्दः 'यानपात्रापरपर्यायः, सिरिवालकहा-४२३ तमगाथायां 'वाहण' शब्दः, प्रयुक्तः, गूर्जरभायायां 'वहाण' उच्यते शब्दोऽयं, 'उवासगदशा' तथा कुर्म्मापुत्र-चरित्रेऽपि विद्यते ।

मकरध्वजतुल्यरूपाः । मर्त्याः कथंभूताः ?-**उद्भूतभीषण-जलोदरभारभुग्नाः** उत्पन्नभीमोदरवृद्धिव्याधि-वक्राः । जलेन युक्तं उदरं-जलोदरम्, भीषणं च तद् जलोदरं च-भीषणजलोदरम्, उद्भूतं च तद् भीषणजलोदरम्-उद्भूत-भीषणजलोदरम्, उद्भूत-भीषणजलोदरस्य भारः-उद्भूत-भीषणजलोदरभारः, उद्भूतभीषण-जलोदरभारेण भुग्नाः-उद्भूत-भीषणजलोदरभारभुग्नाः । पुनः-**उपगताः** प्राप्ताः, कां ?-**दशाम्,** कथंभूताम् ?-**शोच्याम्** । पुनः- **च्युतजीविता-ऽऽशाः**-१ त्यक्तजीवितवाञ्छा जीवितस्य आशा-जीविताशा, च्युता जीविताशा येषां ते-च्युतजीविताशाः ॥४१॥

**आपादकण्ठमुरुशृङ्खलवेष्टिताङ्गा**
**गाढं बृहन्निगडकोटिनिघृष्टजङ्घाः ।**
**त्वन्नाममन्त्रमनिशं मनुजाः स्मरन्तः,**
**सद्यः स्वयं विगतबन्धभया भवन्ति ॥४२॥**

**४२ अज्ञातः**—हे नाथ ! **त्वन्नाममन्त्रं अनिशं स्मरन्तः मनुजाः सद्य स्वयं विगत-बन्धभया भवन्ति ।** तव नाम-त्वन्नाम, त्वन्नाम एव मन्त्रः त्वन्नाममन्त्रः, तं-त्वन्नाममन्त्रम् । बन्धस्य भयं-बन्धभयम्, विगत(तं) बन्धभयं येभ्यः-ते विगत-बन्धभयाः । मर्त्याः कथंभूताः ?-आपादकण्ठ-मुरुशृङ्खलवेष्टिताङ्गाः आपाद-कण्ठं यथा स्यात् तथा, उरुशृङ्खलवेष्टिताङ्गाः । उरवश्च ते शृङ्खलाश्च-उरुशृङ्खलाः, उरुशृङ्खलैः वेष्टितानि अङ्गानि येषां ते-उरुशृङ्खलवेष्टिताङ्गाः। पादौ च कण्ठश्च पाद-कण्ठं, पाद-कण्ठं मर्यादीकृत्य आपाद-कण्ठम् । पुनः-**निगड-कोटिनिघृष्टजङ्घाः**-बृहंश्चासौ निगडश्च-बृहन्निगडः, बृहन्निगडस्य कोटिः-बृहन्निगडकोटिः, बृहन्निगडकोटेः निघृष्टे जङ्घे येषां ते-बृहन्निगडकोटि-निघृष्टजङ्घाः । कथम् ?-**गाढम्**-अत्यर्थम् ॥४२॥

**मत्तद्विपेन्द्र-मृगराज-दवानला-हि-**
**सङ्ग्राम-वारिधि-महोदर-बन्धनोत्थम् ।**
**तस्याशु नाशमुपयाति भयं भियेव,**
**यस्तावकं स्तवमिमं मतिमानधीते ॥४३॥**

**४३ अज्ञातः**—हे नाथ ! **तस्य** पुरुषस्य, **आशु** शीघ्रं, **भयं नाशमुपयाति** । **इव** उत्प्रेक्षते **भिया** भयेन, **यः मतिमान् तावकं इमं स्तवं अधीते,** मतिः-अस्य अस्ति इति मतिमान् । तव इदं-तावकम् । भयं किंविशिष्टम् ?-**मत्तद्विप**-इत्यादि मत्तद्विपेन्द्र-मृगराज-दवाऽनला-ऽहि-संग्राम-वारिधि-बन्धनोत्थम्

द्विपानां इन्द्रः द्विपेन्द्रः मत्तश्चासौ द्विपेन्द्रश्च-मत्तद्विपेन्द्रः । मृगाणां राजा मृगराजः, दवस्य अनलः-दवानलः, वारीणि धीयं ते अस्मिन् इति वारिधिः, महत् च तद् उदरं-महोदरम् । मत्तद्विपेन्द्रश्च मृगराजश्च-दवानलश्च-अहिश्च-संग्रामश्च-वारिधिश्च-महोदरं च- बन्धनं च-मत्तद्विपेन्द्र मृगराज-दवानला-ऽहि-संग्राम-वारिधि-महोदर-बन्धनानि, मत्तद्विपेन्द्र-मृगराज-दावानला-ऽहिसंग्राम-वारिधि-महोदर बन्धनेभ्य उत्थम्-मत्तद्विपेन्द्र० मृगराज-दवानला-ऽहि-संग्राम-वारिधि-महोदर-बन्धनोत्थम्, (१) गजेन्द्र, (२) सिंह, (३) दावाऽग्नि, (४) सर्प, (५) रण, (६) समुद्र, (७) जलोदर, (८) बन्धनोद्भवम्-इत्यर्थः ॥४३॥

**स्तोत्रस्रजं तव जिनेन्द्र ! गुणैर्निबद्धां,**
**भक्त्या मया रुचिरवर्णविचित्रपुष्पाम् ।**
**धत्ते जनो य इह कण्ठगतामजस्रं,**
**तं 'मानतुङ्ग'मवशा समुपैति लक्ष्मीः ॥४४॥**

**४४ अज्ञातः—**हे **जिनेन्द्र ! यः जनः अजस्रं तव स्तोत्रस्रजम् कण्ठगतां धत्ते**-करोति=पठति इत्यर्थः । स्तोत्रम् एव स्रग्-स्तोत्रस्रग्-ताम्-स्तोत्रस्रजम् । स्तोत्रस्रजं किंभूताम् ?-**निबद्धाम्** रचितां कैः ? -**गुणैः**, केन ?-**मया**, कया ? **भक्त्या** । पुनः किंलक्षणां स्तोत्रस्रजम् ?-**रुचिरवर्ण-विचित्रपुष्पाम्**-रुचिरवर्णेभ्यः विचित्राणि पुष्पाणि यस्यां सा-रुचिर-वर्णविचित्रपुष्पा, ताम् । **मानतुङ्गं** पुरुषं, **अवशा लक्ष्मीः** समुपैति समन्तात् समीपं आयाति-इत्यन्वयम् । न वशा-अवशा तद्गतचित्ता इत्यर्थः । मानेन तुङ्गः-मानतुङ्गः, तं-मानमहत्तरम् इत्यर्थः ॥४४॥

# निःश्रेयसम्
संस्कृत–पत्रम्

## खण्ड–२
## अर्वाचीन कृतयः

# श्रीशतकप्रकरणप्रस्तावना

**- तपागच्छेश पू.आ.श्री विजयरामचन्द्रसूरीश्वराः**

इहानन्तभवभ्रमणनिबन्धनमहामोहसन्ततिसलिलगहने विविधाधिव्याधिनक्रचक्रातिरौद्रे जातिजरामरण-प्रबन्धमहोर्मिभीमे गम्भीरापारसंसारवारांन्निधौ निमज्जता पुरुषेण प्रवणं यानपात्रमिव संप्राप्य श्रीसर्वज्ञधर्मान्वितं मनुष्यजन्म परोपकारे यतितव्यम्। तस्यैव सकलधर्मसारत्वेन यथोक्तमनुष्यजन्मफलत्वात्, उक्तं च-

**सङ्क्षेपात् कथ्यते धर्मो, जनाः किं विस्तरेण नः?। परोपकारः पुण्याय पापाय परपीडनम् ।।१।।**

स चोपकारः परमार्थतो जिनवचनोपदेश एव, तस्यैवानन्तभवोपचितक्लेशविच्छेदहेतुत्वादिति जिनवचनोपदेशेनैवोपकर्त्तव्याः प्राणिनः। स च जिनवचनोपदेशो यद्यप्युपदेष्टव्यभेदादनेकधा, तथापि कर्मणः सकलदुःखमूलत्वात्तत्स्वरुपमेव यत्नतो ज्ञापनीयम्। ज्ञापिते हि सकलदुःखमूले कर्मण्यवगततत्स्वरुपाः प्राणिनः तदपगमार्थं यत्नमाधाय परमनिवृत्तिमधिगच्छन्तीति निश्चित्य, बहुविस्ताराऽतिगम्भीरकर्मप्रकृति-प्राभृतादिग्रन्थोक्तकर्मस्वरुपावगाहनाऽसमर्थानां तथाविधायुर्बलमेधादिसामग्रीविकलानां साम्प्रतसाधूनामनुग्रह-काम्यया समधिगतश्रुतजलधितत्त्वैरनेकवादसमरविजयिभिः श्रीशिवशर्मसूरिभिः सङ्क्षिप्ततरं सुखावबोधं च गाथाशतपरिमाणनिष्पन्नं यथार्थनामकं शतकाख्यं प्रकरणमभ्यधायि इति तु व्याख्याकर्तृभिर्मलधारगच्छीय श्रीमद्हेमचन्द्रसूरिभिरेव प्रस्तावितम्, अत एव सान्वर्थाभिधेयस्य सङ्क्षिप्ततरस्य सुखावबोधस्य दृष्टिवादनामक-द्वादशाङ्गसूत्रात् समुद्धरितत्वेन सारभूतस्य चास्य प्रकरणरत्नस्य के पारमेश्वरप्रवचनपरमार्थवेदिनः प्रणेतारः? किमर्थं चास्य प्रणयनम्? इत्यादिप्रश्नपरम्पराया नास्त्यवकाशलेशोऽपि। परं पूज्यप्रवराश्चेमे कदेमं मानवलोकम् विशेषतया जैनसमाजम् अनन्यसाधारणेन स्वकीयजीवनेनोपाकृषत? इत्ययं प्रश्नस्त्ववश्यंतयोपतिष्ठते, तथाऽपि साधनाभावात् नालंभूष्णुरहमेनं समाधातुम्। सामान्येन पूर्वधरकालस्य वीरसमानां सहस्रत्वात् ते तदन्तरालभाविन इति तु निर्विवादं, विशेषेण दृष्टिवादपाठ्यभ्यर्थनया श्रुतकेवलिकालः स्यात्, स च वीरसमानां शतद्वय्येवेति निर्णेयं स्यात्। अभिजनादिज्ञाने तु न साधनमिति निरुपायः। **''चोद्दसविहाओ सव्वाओ पुव्वगयाओ कहेसि''** इति वचनमपि तेषां प्रभूणां सकलश्रुतधरत्वद्योतकम्।

यद्यप्यस्मिन् प्रकरणरत्ने गाथानां सप्ताधिकशतमानस्य दृश्यमानत्वेन भवत्येतत् शङ्कास्थानं यदुत ''गाथाशतपरिमाणनिष्पन्नं यथार्थनामकं शतकाख्यं प्रकरणम्'' इत्येतत् कथनं कथङ्कारं सत्यतामश्नुति? परं तन्न युज्यते, यतस्तस्य प्रथमा गाथाऽभिधेयाऽभिधायिका, द्वितीया तृतीया च द्वारप्रतिपादिका, गुणस्थानेषु योगानां मतान्तरद्योतिका त्रयोदशी गाथा त्वन्यकर्तृका, यद्वा स्वकर्तृकापि मतान्तरेण गुणस्थानेषु योगानां

प्रतिपादकत्वेन पृथक्तया न गणनीया, अन्तिमाः तिस्रश्च क्रमशः ग्रन्थोपसंहार-स्वौद्धत्यपरित्याग-ग्रन्थप्रयोजनादिप्रतिपादिकाः सन्ति, अतोऽस्य सान्वर्थाख्यायां नास्त्येव यत्किञ्चिदपि शङ्कास्थानम्। व्यवहारतो वा पञ्चाशके यथा न्यूनाधिकगाथासंभवेऽपि पञ्चाशकाह्वा, अष्टके षोडशकेऽपि तत्तदाह्वा तथाऽत्र।

**'किं परिकम्म-सुत्त-पढमाणुओग-पुव्वगय-चूलिगामइयातो सव्वाओ दिट्ठिवायाओ कहेसि? न इत्युच्यते, पुव्वगयाओ। किं उप्पायपुव्व-अग्गेणिय जाव लोगबिंदुसाराओ त्ति एयाओ चोद्दसविहाओ सव्वाओ पुव्वगयाओ कहेसि?, न इत्युच्यते, अग्गेणियातो बीयाओ पुव्वातो। किं अट्ठवत्थुपरिमाणाओ अग्गेणियपुव्वातो सव्वातो कहेसि? न इत्युच्यते, पुव्वंते अवरंते धुवे अधुवे एत्थं खणलद्धीणामपंचमं वत्थुं, तातो पंचमातो वत्थुतो कहेमि। किं सव्वातो वीसइपाहुडपमाणमेत्तातो कहेसि? न इत्युच्यते, तस्स पंचमस्स वत्थुस्स चउत्थं पाहुडं कम्मपगडीनामधेज्जं ततो कहेमि। तस्स चउव्वीसं अणुओगदाराइं भवंति, तं जहा-**

**कइ[१] (केवइ) वेदणा[२] (वेदण) फासे[३] कम्मं[४] पगडी[५] य बंधण[६] णिबंधे[७]। पक्कम[८] [९]अवक्कमुदए[१०] मोक्खे[११] पुण संकमे[१२] लेस्सा[१३] ।।१।। लेसाकम्मे[१४] लेसापरिणामे[१५] तह य सायमस्साते[१६] । दीहे हस्से[१७] भवधारणीय[१८] तह पोग्गला[१९] अत्ता ।।२।।**

**णिहत्तमणिहत्तं[२०] च णिकाइयमणिकाइयं[२१] च कम्मठिती[२२]। पच्छिमखंधे[२३] अप्पाबहुगं[२४] च सव्वत्थओ ।।३।.त्ति,**

**किं सव्वतो चउवीसाणुओगदारमइयातो कहेसि? न इत्युच्यते, तस्स छट्ठमणुओगदारं बंधणं ति ततो कहेमि। तस्स चत्तारि भेदा, तंजहा-बंधो बंधगो बंधणीयं बंधविहाणं ति, किं सव्वातो चउव्विहाणुओगदारातो कहेसि? न इत्युच्यते, बंधविहाणं ति चउत्थमणुओगदारं ततो कहेमि। तस्स चत्तारि विभागा, तंजहा-पगइबंधो अणुभागबंधो पदेसबंधोत्ति मूलुत्तरपगइभेयभिन्नो, ततो चउविहातो वि किंचि किंचि समुद्धरिय समुद्धरिय भणामि।'** इत्यनेन चूर्णिकारचरणानामुल्लेखेनेत्येतत्तु स्पष्टमेवावसीयते यदुत परिकर्म-सूत्र-प्रथमानुयोग-पूर्वगत-चूलिकामयो हि दृष्टिवादो द्वादशमङ्गं, तस्मिन्नपि चतुर्दशपूर्वमयपूर्वगतविभागे अष्टवस्तुसमन्वितं श्रीसप्ततिकाभाष्य-टीकाकारवचनानुसारेण च चर्तुदशवस्तुसमन्वितं च द्वितीयमग्रायणीयाख्यं पूर्वमस्ति, तत्रापि क्षणलब्धिनाम पञ्चमं वस्तु, प्रस्तुत-

प्रकरणव्याख्याप्रणेतारस्तु प्रणिविकल्पाख्यं पञ्चमं वस्त्विति, तस्मिन्नपि कर्मप्रकृतिनामकं चतुर्थं प्राभृतं श्रुतविशेषरुपम्,तस्मिन्नपि बन्धनाभिधं षष्ठमनुयोगद्वारं, तत्रापि चतुर्थं बन्धविधानाख्यमनुयोगद्वारं, तस्य प्रकृतिबन्धादिकाश्चत्वारो भेदाः, तेभ्यश्चतुर्भ्योऽपि भेदेभ्यः किंचित् सारभूतं समुद्धृत्य समुद्धृत्य रचितमिदं प्रकरणरत्नमेभिः पूर्वधरपूज्यपादैः।

इदं प्रकरणरत्नं दृष्टिवादनिबन्धनमिति तु साक्षात् ग्रन्थकृद्वचनात् चूर्णिकारवचनाच्च सुस्पष्टम्। एतत् दृष्टिवाद-निबन्धनमित्येव न, किंतु

**''सारजुत्ताओ। वोच्छं कइवइयाओ गाहाओ दिट्ठिवायाओ ।।** इति ग्रन्थकृद्वचनात्,

**''दृष्टिवादो द्वादशमङ्गं तस्मात्, दृष्टिवादे हि द्वितीयमग्रायणीयाख्यं पूर्वमस्ति, तत्रापि प्रणिधिकल्पाख्यं पञ्चमं वस्तु, तस्मिन्नपि कर्मप्रकृतिप्राभृतं नाम चतुर्थं प्राभृतं श्रुतविशेषरुपम्, तत्रापि यत्कर्मप्रकृतिबन्धनलक्षणं द्वारं, तस्मादुद्धृत्यैता गाथा अहं वक्ष्ये इति भावार्थः ।''**

इति व्याख्यातृवचनाच्चास्मिन् प्रकरणरत्ने यत् गाथानां शतकं तत्र सैद्धान्तिको महान् भागो दृष्टिवादसत्क एवेति निश्चीयते। अनेन संसारवारांनिधौ तरीकल्पां श्रीजिनमूर्तिं जिनपूजां च ये निषेधयन्ति तेषां लुम्पकमतीनां यश्च कश्चिदैदंयुगीनः पण्डितंमन्योऽन्धचक्रवर्त्ती चैत्यं जिनौकस्तद्बिम्बम् इत्यादि प्रमाणान्यवमत्य 'वस्तुगत्या चैत्यशब्दो नास्ति जिनमूर्त्यादिवाचको नास्ति च श्रीजिनपूजा सूत्रविहिता' इत्यादिकं प्रलपति तस्य च मुखबन्धो विधीयते, यत एतस्मिन् प्रकरणरत्ने-

**अरहंत-सिद्ध-चेइय-तव-सुय-गुरु-साहु-संघपडिणीओ।**
**बंधइ दंसणमोहं अणंतसंसारिओ जेणं ।।१८।।**
**पाणवहाईसु रओ जिणपूआमोक्खमग्गविग्घकरी।**
**अज्जेइ अंतरायं न लहइ जेणिच्छियं लाभं ।।२६।।**

इति गाथायुग्मेन स्पष्टतया ज्ञापितमेतत् यदुत चैत्यस्यापि प्रत्यनीकोऽवर्णवादाद्यनिष्टनिर्वर्त्तको जीवो येन बद्धेनाऽनन्तसंसारिको भवति तद्दर्शनमोहं-मिथ्यात्वमोहनीयं कर्म बध्नाति, जिनपूजाविघ्नकरश्चार्ज्जयति-निर्वर्त्तयति पञ्चप्रकारमप्यन्तरायं कर्म।

यद्विषयवर्णनमस्मिन् प्रकरणरत्नेऽस्ति नव्यशतके-पञ्चमकर्मग्रन्थे च नास्ति तत् प्रदर्श्यते-

''द्वाषष्टिमार्गणास्थानेषु चतुर्दश जीवस्थानानि, चतुर्दशजीवस्थानेषूपयोगाः योगाश्च, द्वाषष्टिमार्गणास्थानेषु गुणस्थानानि, गुणस्थानेषूत्तरप्रकृतिबन्धस्वामित्वम्, मार्गणासु बन्धस्वामित्वम्, उत्तरप्रकृतिषु च मिथ्यात्वाद्याश्चत्वारः प्रत्ययाः।'' परमुक्ता एते षडशीतौ ।

अथ च यद्विषयवर्णनं नव्यशतके वर्त्ततेऽत्र च न वर्त्तते तत् प्रकाश्यते-

''ध्रुवबन्धोदयसत्तापरावर्त्तप्रकृतयः सप्रतिपक्षाः, उत्तरप्रकृतीनां जघन्योत्कृष्टस्थितिः, एकेन्द्रियादिषु स्थितिप्रतिपादनम्, अबाधाकालः, एकस्मिन् मुहूर्त्ते क्षुल्लकभवप्रमाणम्, गुणस्थानेषु स्थितिबन्धः, एकेन्द्रियादिस्थितिबन्धानामल्पबहुत्वम्, सान्तरबन्धस्य निरन्तरबन्धस्य चोत्कृष्टेतरकालमानम्, वर्गणास्वरुपम्, गुणश्रेण्याः, गुणस्थानानां जघन्यमुत्कृष्टं चान्तरालम्, पल्योपमस्वरुपम्, पुद्गलपरावर्तस्वरुपम्, श्रेणिद्वयं चेति।'' अन्यत्रैतदर्थस्य दृब्धत्वाद् नात्रोल्लेखः।

चतुर्दशानां पूर्वाणामग्रायणी (ग्रेणीय) नामकद्वितीयपूर्वान्तर्गतविंशतिप्राभृतप्रमाणपञ्चमवस्तुनः सकाशाच्चतुर्थाच्चतुर्विंशत्यनुयोगद्वारमयात्कर्मप्रकृत्याख्यात्प्राभृतात् समुद्धरितत्वेन दृष्टिवादनिबन्धनः सकलकार्मिकग्रन्थचूडामणीभूतः कर्मप्रकृतिनामा प्राचीनप्रबन्धोऽप्येभिरेव पूर्वधरपूज्यैः प्रणीतो वर्तते, तस्मिन् बन्धनसङ्क्रमणोद्वर्त्तनोदीरणोपशमनानिधत्तिनिकाचनात्मकं करणाष्टकमुदयः सत्ता चेति प्रकरणदशकं विद्यते, तत्र च यद्वन्धननामकं करणं तत् तदैव सुज्ञातं भवति यदेदं प्रकरणं परिशीलितं स्यादिति त एव पूज्यपादा बन्धनकरणोपसंहारे प्ररुपयन्ति, तथा च तत्पाठः-

**''एवं बन्धकरणे परुविए सह हि बंधसयगेण।**
**बंधविहाणाभिगमो सुहमभिगंतु लहुं होइ ।।१०२।।''**

अनेनास्य प्रकरणरत्नस्यातीवोपयोगित्वं परमोपकारित्वं च परिस्फुटतयाऽवसीयते। अतीवोपयोगितया परमोपकारितया च प्रतिष्ठितस्यास्य प्रकरणरत्नस्योपरि चेत् न स्यात्? **माने बहुवचनं 'तच्चूर्णीनामतिगम्भीरत्वात्'** इति वचनाद् (?) अनेकाः चूर्णयः कृता आसीरन्, परं ताः केनापि कारणेन व्यवच्छिन्नाः, केवलमेका लघुचूर्णिः दृश्यते, सा च पूर्वसूरिप्रणीता आराध्यपाद-अनुयोगाचार्य-गुरुगुरुवर्यश्रीमद्दानविजय-गणिवरसदुपदेशसंस्थापित-राजनगरस्थ=श्रीवीरसमाजेन स्वकीयप्रथमग्रन्थरत्नतया पूर्वमेव प्रकाशिता। तस्यां द्वादशतमपत्रस्य प्रथमपृष्ठेऽष्टम-पङ्क्तौ ''वेउव्विय आहारग दुगसहिया'' इति मुद्रितं, परं तदशुद्धं जातं, तत्स्थाने मूलपाठ एव सम्यग्। एवमवक्तव्यबन्धाधिकारे एकोनचत्वारिंशत्तम-पत्रद्वितीयपृष्ठे पञ्चदशतमपङ्क्तौ 'चारित्त' इत्यपि निष्प्रयोजनमेव जातम्। तथाऽत्र श्रीमद्गुणरत्नसूरिरचिता अवचूरिरपि विद्यते,

कर्तृनामरहिते चतुर्विंशतिगाथाप्रमिते द्वे भाष्ये अपि वर्तते। तयोरेकं भाष्यं गुरुवर्य्यैः कृत्वा नूतनं टिप्पनकं निवेशितमस्य ग्रन्थस्य प्रान्तभागे। एकं तु बृहद्भाष्यं श्रीचक्रेश्वरसूरिविरचितं तच्चास्मिन्नेव मुद्रितम्। अत्र मुद्रितस्य बृहद्भाष्यस्य प्रणेतारः श्रीमन्तश्चक्रेश्वरसूरयः केषां कृपापरीतचेतसां गुरुवर्य्याणां शिष्यभावं प्रतिपन्नाः? कस्मिंश्च समये किमर्थं चैतद्भाष्यं विरचितवन्तः? इत्यादिकं ज्ञातुं समीहा चेत्? अवलोकनीयं तस्यैवान्तिममार्यापञ्चकम्। तच्चेदम्-

**सिरिवद्धमाणगणहर-सीसेहि विहारुगेहि सुहबोहं। एयं सिरिचक्केसरसूरीहिं सयगगुरुभासं ।।१९।।**
**गुणहरगुणधरनामगनिययविणेयस्स वयणओ रइयं। सुयणे सुणंतु जाणंतु बुहजणा तह विसोहिंतु ।।२०।।**
**सत्तनवरुद्दम्मि य वच्छरम्मि विक्कमनिवाउ वट्टंते। कत्तियचउमासदिणे गोल्लसणे विसयविसेनयरे ।।२१।।**
**दहिवद्दंमी सिरिसिद्धरायभूवइपसायगेहस्स। अन्नलदेवनिवइणो सुहरज्जे वट्टमाणम्मि ।।२२।।**
**निप्फत्तिमुवगयमिणं ता नंदउ जाव सिद्धिसुहमूलो। तियलोक्कपायडजसो जिणवरधम्मो जए जयइ ।।२३।।**

श्रीउदयप्रभसूरिसन्दृब्धं षड्विंशतिश्लोकन्यूनसहस्रपरिमितं टिप्पनकमपि वर्त्तत इति प्राच्यकर्मग्रन्थ-प्रस्तावनायामुक्तम्।

अथाऽस्य व्याख्याकर्त्तारोऽनुयोगद्वारविशेषावश्यकभाष्यादिवृत्तिकरणतो विख्यातकीर्तयोऽप्य-विख्यातेतिवृताः श्रीमन्तः श्रीहर्षपुरीय अपरनाम मलधारगच्छीयश्रीमदभयदेवसूरिशिष्याः श्रीमद्धेमचंद्रसूरय इति त्वेतत्प्रस्तुतप्रकरणवृत्तिप्रशस्तिप्रान्तवर्तिनाऽनेन काव्यपञ्चकेनावगम्यते-

**आज्ञा यस्य नरेश्वरैरपि शिरस्यारोप्यते सादरं, यं दृष्ट्वापि मुदं व्रजन्ति परमं प्रायोऽतिदुष्टा अपि।**
**यद्वक्त्राम्बुधिनिर्यदुज्ज्वलवचःपीयूषपानोद्यतै-र्गीर्वाणैरपि दुग्धसिन्धुमथने तृप्तिर्न लेभे जनैः ।।६।।**
**कृत्वा येन तपः सदुष्करतरं विश्वं प्रबोध्य प्रभो-स्तीर्थं सर्वविदः प्रभावितमिदं तैस्तैः स्वकीयैर्गुणैः।**
**शुक्लीकुर्वदशेषविश्वकुहरं, भव्यैर्निबद्धस्पृहं, यस्याशास्वनिवारितं विचरति श्वेतांशुगौरं यशः ।।७।।**
**यमुनाप्रवाहविमलश्रीमन्मुनिचन्द्रसूरिसम्पर्कात्। अमरसरितेव सकलं, पवित्रितं येन भुवनतलम्।।८।।**
**विस्फूर्ज्जत्कलिकालदुस्तरतमःसन्तानलुप्तस्थितिः, सूर्येणेव विवेकभूधरशिरस्यासाद्य येनोदयम्।**
**सम्यग्ज्ञानकरैश्चिरन्तनमुनिक्षुण्णः समुद्द्योतितो, मार्गः सोऽभयदेवसूरिरभवत्तेभ्यः प्रसिद्धो भुवि ।।९।।**
**तच्छिष्यलवप्रायै-रगीतार्थैरपि शिष्टजनतुष्टयै। श्रीहेमचन्द्रसूरिभि-रियमनुरचिता शतकवृत्तिः ।।१०।।**

एभिश्च पारमेश्वरप्रवचनपानपीवरैः प्रवचनतत्त्वनिरुपणप्रवणैः पूज्यप्रवरैः कस्मिन् काले पावितेयं भारतभूमिः ? इति जिज्ञासायां जातायाम् एभिरेव विरचितस्य विशेषावश्यकविवरणस्य प्रशस्तौ स्थापिताभ्यां-

**तच्छिष्यलवप्रायैरगीतार्थैरपि शिष्टजनतुष्ट्यै। श्रीहेमचन्द्रसूरिभिरियमनुरचिता प्रकृतवृत्तिः ।।१०।।**
**शरदां च पञ्चसप्तत्यधिकैकादशशतेष्वतीतेषु। कार्तिकसितपञ्चम्यां श्रीमज्जयसिंहनृपराज्ये ।।११।।**

इत्येताभ्यां पद्याभ्यां स्पष्टतयाऽवसीयते यदुतैभिः पूज्यैर्विक्रमार्कीयद्वादशशताब्द्यामेव पवित्रितेयं भारतभूमिः।

सिद्धान्ततत्त्वनिरुपणप्रवणाः सहृदयहृदयहारिणः के के ग्रन्था आराध्यपादैरेभिः संदृब्धा? इति जिज्ञासायामपि प्रदर्शयितुं ग्रन्थनिर्माणप्रयोजनमेभिरेव सूरिपुरन्दरैः समुल्लिखितः सविस्तरो गद्यमयो लेख एव समालोकनीयः, तस्मिन् ग्रन्थनामप्रदर्शनपरो य उल्लेखः स चायम्-

**''ततो मया तस्य परमपुरुषस्योपदेशं श्रुत्वा विरचय्य झटिति निवेशितमावश्यक-टिप्पनिकाभिधानं सद्भावनामञ्जूषायां नूतनफलकम्, ततोऽपरमपि शतकविवरणनामकम्, अन्यदप्यनुयोगद्वारवृत्तिसंज्ञितम्, ततोऽपरमप्युपदेशमालासूत्राभिधानम्, अपरं तु तद्वृत्तिनामकम्, अन्यच्च जीवसमासविवरणनामधेयम्, अन्यत्तु भवभावनासूत्रसंज्ञितम्, अपरं तु तद्विवरणनामकम्, अन्यच्च झटिति विरचय्य तस्याः सद्भावनामञ्जूषाया अङ्गभूतं निवेशितं नन्दिटिप्पनकनामधेयं नूतनदृढफलकम्। एतैश्च नूतनफलकैर्निवेशितैः वज्रमयीव संजाताऽसौ मञ्जूषा तेषां पापानामगम्या। ततस्तैरतीवच्छलघातितया संचूर्णयितुमारब्धं तद्द्वारकपाटसंपुटम्। ततो मया ससंभ्रमेण निपुणं तत्प्रतिविघानोपायं चिन्तयित्वा विरचयितुमारब्धं तद्द्वारपिधानहेतोर्विशेषावश्यक-विवरणाभिधानं वज्रमयमिव नूतनकपाटसंपुटम्।''**

एतत्संशोधनक्रियायां च संशोधकपूज्यैः कृतेऽपि विशेषप्रयत्ने वृत्तिसत्कं, पुस्तकद्वयं भाष्यसत्कं त्वेकमेव समासादितम्। एकं शान्ततपोमूर्तिश्रीमद्विजयसिद्धिसूरीश्वरसत्कमशुद्धं, द्वितीयं च मुनिश्रीचतुरविजयद्वारा पट्टनाख्यपत्तनश्रीसंघसत्कं शुद्धप्रायं च। भाष्यसत्कं तु प्रवर्तकश्रीमत्कान्तिविजयसत्कमशुद्धतरतमं च। अत एव वृत्तभङ्गयुतं भाष्यं मदीयगुरुवर्यैः प्रायेण टीकानुसारेणैव संशोधितं तत्र च संभव्येव दोषसद्भावोऽतः संशोधनीयमेव तत् शेमुषीशालिशेखरैरिति समीहन्ते ते पूज्यपादाः।

अथाऽस्य प्रतिकृतिसंशोधनं तु कर्मप्रकृत्यादिशास्त्ररत्नरत्नाकरकल्पैर्मदीयगुरुवरैः सच्चारित्रपवित्रगात्र-श्रीमद्विजयसिद्धिसूरीश्वराणां साहाय्यैनैवाकारि। प्रुफाणां संशोधनेऽपि न्यायाम्भोनिधिश्रीमद्विजयानन्दसूरीश्वर-शिष्यरत्नमहामहोपाध्याय श्रीमद्वीरविजयविनेयावतंससिद्धान्तरत्नरत्नाकरकल्प-मदीयगुरुगुरुवर्य्य-अनुयोगाचार्य्य-श्रीमद्-दानविजयगणिनः, सर्वज्ञसिद्धान्तसन्निहितहृदयश्रीमद्विजयसिद्धिसूरीश्वर-शिष्यरत्नस्वकीयदेशनाशक्त्या-ऽवर्जितसकलभव्यनिवह-पंन्यासपदपरिमण्डित-श्रीमन्मेघविजयगणयः, मुख्यतया पठनपाठनरसिकमदीय-गुरवश्चायासमाभेजुः।

एभिः पण्डितप्रकाण्डैः पूर्वोक्तपुस्तकत्रितयाधारेण महता प्रयासेन च संशोधितेऽप्यस्मिन् प्रकरणरत्ने छद्मस्थानां स्वाभाविकेन प्रमाददोषेणाऽक्षरयोजकदोषेण दृष्टिदोषेण वा कथंचिदत्राशुद्धं कृतं वा भवेत्तत् संशोधनीयं विपश्चिदपश्चिमैः, संसूचनीयं च कृपया यदशुद्धं विज्ञायते तद् येन द्वितीयसंस्करणे संस्क्रियेतेति प्रार्थयते-

महींदपुरम्
संवत् १९८०
आश्विन-शुक्लतृतीया

आराध्यपाद-पंन्यासश्रीमद्दानविजयगणिशिष्यरत्नमुनिसत्तमश्री-
प्रेमविजयगणिवरपादारविन्दमधुव्रतो
मुनिरामविजयः

# यशोयोगभेदद्वात्रिंशिकासार :

**देवर्धि:**

१. योग: पञ्चधा ।

२. अध्यात्मं भावना ध्यानं समता वृत्तिसंक्षयश्चेति ।

३. औचित्यवत्त्वे सति, देशाद्यन्यतमचारित्रवत्त्वे सति, वचनानुसारिचिन्तनवत्त्वे सति, मैत्री-करुणा-मुदिता-उपेक्षाभावनावत्त्वम् अध्यात्मलक्षणम् ।

४. मैत्रीति सुखचिन्ता।

५. उपकारिण:, स्वकीयस्य, स्वप्रतिपन्नस्य, सम्बन्धनिरपेक्षस्य सर्वस्य चेति चतुर्विषया सुखचिन्ता मैत्री।

६. करुणेति दु:खनिवारणेच्छा ।

७. सा मोहात्, दु:खितदर्शनात्, संवेगात्, स्वभावाच्च भवति ।

८. तत्र मोहादिति ग्लानस्य याचमानस्य तदपथ्यवस्तुप्रदानाभिलाष: । एवंविध-दानेन क्षणिकहर्षलाभेऽपि याचमानस्य पुनरपि दु:खानुभव एव स्यादिति मोह:।

९. दु:खितदर्शनमात्रेण तस्य वस्त्रादिसामग्रीप्रदानेच्छा स्वयंगम्या।

१०. संवेगादिति मोक्षाभिलाषेण भवभयसमुत्पादनेच्छा सुखितेषु दु:खितेषु वा प्रीतिमत्सु।

११. स्वभावादिति प्रकृष्टसाधकानां महामुनिवराणां सर्वजीवेषु या भवनिस्तारणेच्छा।

१२. अत्र प्रथमद्वितीययो र्दु:खितविषयत्वम्, तृतीयाया: प्रीतिमद्विषयत्वम्, चरमाया: सर्वविषयत्वम्।

१३. मुदितेति परितोषभाव:।

१४. सा आपातरम्ये, सद्धेतौ, अनुबन्धयुते, परे चेति चतुर्धा।

१५. परिणामरौद्रे आपातरम्ये वैषयिके सुखे परितोषभाव: प्रथमा।

१६. परिणामरम्ये आपातसुखे वैषयिके सुखे परितोषभावो द्वितीया।

१७. इहपरभवकल्याणकारणे परितोषभाव: तृतीया।

१८. मोहक्षयादिसम्भवे निराबाधे परितोषभावश्चतुर्थी।

१९. उपेक्षेति मध्यस्थतानुभव:।

२०. करूणा, अनुबन्ध: निर्वेद:, तत्वचिन्तनञ्चेति चत्वारस्तस्य संवेदप्रकारा:।

२१. करुणा हि निजाहितेऽपथ्ये प्रवृत्तस्य तन्निवारणमपसार्य केवलामुपेक्षां जनयति। निवारणोपदेशस्य वैयर्थ्यावगते:।

२२. अनुबन्धस्यालोचनात् कालातिक्रमवर्तिन: पुरुषविशेषस्यालस्यादिकत्यागोपदेशमवधीर्य मध्यस्थभावोऽवलंब्यते । (अर्थार्जनेऽलसं यथा दयादृष्टया पश्यन्ति)

२३. निर्वेदेन च भवविरागबद्धहृदयस्य सकलजनमोहकरेऽपि पदार्थसार्थे सत्त्वातिशयाद् उपेक्षाभाव:।

२४. तत्त्वचिन्तनेन च-यथावस्थित-विश्वपदार्थस्य रागद्वेषादिजनकत्वं नास्ति, मोहनीयादिकर्मणामेव रागादिजनकत्वं वर्तते-इत्यवगत्या सर्वत्रैव माध्यस्थ्यभाव:।

२५. इति मैत्र्यादिभावनाविचार: ।

२६. अत्राध्यात्मलक्षणेषु औचित्यादिलक्षणत्रयमवगण्य केवलं मैत्र्यादिभावस्य चतुर्थलक्षणरूपस्य विचार: कृत इति विशेष:।

२७. सुखीषु ईर्षाभावम्, दु:खिषु उपेक्षाभावम्, पुण्यकार्येषु परकृतेषु द्वेषभावम्, अधर्मिषु च रागद्वेषौ परिहरन् अध्यात्मं लभते।

२८. योगारम्भकाणामेवायमुपदेश: ।

२९. निष्पन्नयोगानां तु मैत्र्यादित: परं परार्थसारं चित्तं सद्बोधमयम्।

३०. अध्यात्मेन हि भवति ज्ञानावरणादिकर्मविलय:, स्वपराक्रमप्रकर्ष:, चित्तसमाधि: वस्तुतत्त्वावगमस्थिरो जीव:।

३१. अध्यात्ममेव स्वसंवेदनलभ्यममृतम्।

३२. अध्यात्मादेव मोहविषसमुत्तार इति ।

३३. अध्यात्मस्यैव ज्ञानसंयुत:, पुन:पुनरभ्यासो भावना।

३४. कामक्रोधादिभ्यो विराम:, शुभभावप्रकर्षश्च भावनाया फलम्।

३५. ज्ञानभावना, दर्शनभावना, चारित्रभावना, तपोभावना, वैराग्यभावनेति तद्भेदा:।

३६. आभिरतिशय: संस्कारबन्ध:।

३७. ध्यानं तु प्रशस्तैकविषयो बोध:।

३८. स्थिरप्रदीपवद् धारानुबद्धज्ञानेऽस्य संभव:।

३९. विषयान्तरव्यवधानमत्र नास्ति।

४०. सूक्ष्मज्ञानसमालोचनसहितश्चेदम्।

४१. ध्याने च खेदादिदोषाष्टकवित्रासो न स्यात् ।

४२ खेद:, उद्वेग:, भ्रम:, उत्थानम्, क्षेप:, आसंग:, अन्यमुद, रूग् इत्यष्टौ दोषा:।

४३. प्रवृत्तिजनितो मानसदु:खानुबन्धो प्रयास: खेद:।

४४. एतेन प्रणिधाने एकाग्रता न भवति ।

४५. प्रवृत्तिविरतस्य योगद्वेषजनित: मनोभाव उद्वेग:।

४६. अनादरभाव एवासौ ।

४७. तेन शुभक्रियासु मान्द्यम्।

४८. एतेनागामिजन्मसु योगिकुलानामस्याप्राप्तिः।
४९. कृतायामपि क्रियायां कृताकृतसंशयो भ्रमः।
५०. क्रियाजनितं संस्काराधानमेतेन न भवति ।
५१. संस्कारवैकल्ये च निष्फलता, अनिष्टफलता वा ।
५२. ईतरविषयोपशमवद् धर्मकरणविषयमेव चित्तं प्रशान्तवाहि ।
५३. तदभावेऽप्रशान्तवाहितादोषः । स एवोत्थानम्।
५४. तेन क्रियाजनितशुभाध्यवसायलाभो न भवेद् ।
५५. शुभक्रियाऽत्र केवलं लोकापवादादिभयेन।
५६. उपादेयत्वभावेऽपि नास्य भवति विशेषविपाकः।
५७. क्षेप इति अधिकृतादन्यकर्मणि मनोधावनम्।
५८. क्षेपोऽयं योगकरणकाल एव प्रवर्तते ।
५९. एतेन फलविरहो भवति ।
६०. असकृदुत्पाटितशालिवत् फलजननसामर्थ्यनाशात् ।
६१. आसङ्ग इति अधिकृतक्रियास्थान एव समासक्तिः।
६२. एतेनोत्तरक्रियास्थानलाभो न स्याद् ।
६३. उत्तरोत्तरगुणप्राप्तिप्रधानं हि शासनम् ।
६४. तदभावेनासङ्गे गौतमादिवद्दोषः।
६५. अन्यमुद् इति अधिकृतक्रियातोऽन्यक्रियायां रागः।
६६. अधिकृतक्रियायामत्र रागाभावः।
६७. आदरविकलाराधनेन च क्रियावैयर्थ्यम्।
६८. रुग् इति प्रकृते शङ्का पीडानुभवो भङ्गो वा।
६९. एतेनानुष्ठानोच्छेदः ।
७०. क्रियमाणमपि तत् बलात्कारनिहितमितिव्यर्थम्।
७१. ध्याने सर्वेषाममीषां दोषाणां विलयः।
७२. ध्याता दोषाभावेन शान्त उदात्तश्च भवति।
७३ तद्ध्यानं तस्यैवायतिहितम्।
७४. ध्यानस्य फलं तु-सर्वकार्यवशिता, अध्यवसायानां स्थैर्यं, भवान्तरपरम्परा-मूलकर्मणां च व्यवच्छेद इति।
७५. लोकव्यवहाराद् इष्टानिष्टतया प्रसिद्धेषु वस्तुषु विवेकबोधाद् यथास्थितदृष्टया निभालनम् इति समतायोगः।

७६. इदं ममेष्टम्, इदं नेष्टम् इति मनोभाववैकल्यं समता।
७७. ध्यानादियं भवेद्, इतश्च ध्यानम्।
७८. मिथोऽनुग्रहकारित्वमेतयोः, नान्योऽन्याश्रयदोषोऽत्र।
७९. परस्परं स्वस्थानादुत्कर्षगुणलाभजनकत्वाद, एकतराभावेऽन्यतराभाव इत्यपि वाच्यते।
८०. अत्रामर्षौषधिप्रमुखऋद्धिलाभेऽपि तस्योपयोगो नास्ति। सकलबाह्यभावाशंसा निवृत्तेः।
८१. ज्ञानदर्शनयथाख्यातचारित्रावरणकारणानां कर्मणां क्षयोऽपि समताफलम्।
८२. सकलेच्छाभावव्युपरमश्चापि समताफलम्।
८३. मनःशरीरद्रव्यसंयोगजनितानां विकल्पानां वृत्तीनामप्रसिद्धानां समूलकाषं विनाशः, वृत्तिसंक्षयः।
८४. केवलज्ञानलाभकाले, मनोविकल्पानाम्, अयोगिकेवलित्वकाले शरीरविकल्पानां क्षयः।
८५. अध्यात्मादियोगपञ्चकविचारः पूर्णः।
८६. वृत्तिरोधो योग इति लक्षणोऽपि योगः पञ्चधा।
८७. मनोव्यापाररुपा वृत्तिः।
८८. तस्याः प्रथमाभ्यासः प्रवृत्तिः।
८९. तस्याः उत्कर्षकाष्ठाप्राप्तिः स्थिरता।
९०. इदमेव मनोगुप्तित्रयम्।
९१. अध्यात्मादिचतुष्टयं प्रथमाभ्यासो योगस्य।
९२. वृत्तिसंक्षयस्तु स्थिरता योगस्य।
९३. मनोगुप्तिस्त्रिधा।
९४. कल्पनाजालविमुक्तं मनः प्रथमा।
९५. समतायामवस्थितं मनो द्वितीया।
९६. आत्मभावनिर्लीनं मनः तृतीया।
९७. समितिगुप्तिविस्तर एव योगः।
९८. तेन वचनकायगुप्तियुगलमपि योगेऽवतीर्णम्।
९९. समितिगुप्तिविहीनो न कोऽपि योगः।
१००. अध्यात्मादिर्योग उपायः, वृत्तिसंक्षयस्तु योगः।
१०१. एवं च पञ्चमगुणस्थानाद् अर्वाग् उपायरूपो योगः।
१०२. पञ्चमात् पुनः सानुबन्धा योगप्रवृत्तिः।

# संस्कृतभाषैव विश्वभाषापदवीमर्हति

-कविराजो द्विजेन्द्रनाथः शास्त्री

गरिष्ठगुणगरिम्णा सुतरामेतत्प्रतिपत्तुं पार्यते यत्संस्कृतभाषैव विश्वभाषापदमर्हतीति। विषयममुमधिकृत्य किञ्चिदेवात्र विविच्यते। विश्वस्मिन् जगति यावत्यो भाषापदार्हाः संस्कृत-प्राकृत-लेटिन-ग्रीक-इंग्लिशाद्याः भाषाः तत्र तत्र देशेषु लब्धप्रसरा दृश्यन्ते तासु श्रेष्ठत्वेन, सौष्ठवेन, परिपूर्णत्वेन, सारल्येन, माधुर्यादिना, यथार्हगुणगरिम्णा, सर्वोत्कृष्टत्वेन च या विलसतितरां सा तु खलु संस्कृतभाषैव। अन्यस्यां कस्यामपि भाषायां न तादृशं सर्वाङ्गपूर्णं व्याकरणम्, नापि तादृशः शब्दकोषः, न च तादृशी वैज्ञानिकी लिपीः वर्णमाला वा विद्यते, यादृशी संस्कृतभाषायाम्। संस्कृतभाषायां यल्लिख्यते तदेव पठ्यते मात्रयाऽपि ततो भिद्यते। अन्यासु भाषासु तथा नास्ति। लिख्यतेऽन्यत् पठ्यते चान्यत्। तद्यथा आङ्ग्लभाषायाम् लिख्यते (Know) क्नो पठ्यते च नो, (But) बट पठ्यते, (Put) च पुट इति पठ्यते। किं हेतुकोऽयं भेद इति कारणं पृष्टाः प्रतिवदन्ति ते इदं स्वयमेवावगतम्भवति। एतदवगतमाहोस्वित् कदवगतमिति तु खल्वीश्वर एव वेत्ति (It is understood. God Knows whelther it is understood or misunderstood.) इति प्रज्ञावन्त एव विभावयन्तु। एवं शतशः शब्दाः सन्ति तादृशाः येषां लेखनमन्यादृशमुच्चारणञ्चान्यादृशमिति कीदृशोऽयं विभ्रमविलासः।

किञ्च-भाषोच्चारणौपयिका यावन्तः कण्ठताल्वादिस्थानविशेषसमुद्भूता ध्वनिविशेषा न तावन्तः सर्वे संस्कृतं विहाय अन्यासु भाषासु सम्भवन्ति। यथा-आङ्ग्लभाषायां तकारो नास्ति। फ्रेंचभाषायां टकारडकारौ न स्तः। आङ्ग्ललिप्यां पुनः चकारः, धकारः, ठकारः, छकारः, फकारः, खकारः, थकारश्च न स्वतन्त्रसत्तां लभन्ते संस्कृतभाषायां तु पुनः स्वतन्त्रसत्ताकास्ते। किं बहुना वर्गाणां चतुर्थस्याक्षरस्य सर्वथा अभाव एव तासु तासु आङ्ग्ललिपिपिनद्धासु भाषासु दृश्यते। ईदृशं वर्णवैकल्यं नाम किन्नास्त्युपहासास्पदम्? सर्वासामपि योरोपीयभाषाणां वर्णमालायाः समानाकारत्वाद् ता अपि तद्दोषदुष्टा एवेति कृत्वा आङ्ग्लभाषावत्ता अपि विश्वभाषापदवीं नार्हन्तीति।

यथा हि वर्णदारिद्र्यं तथा शब्ददारिद्र्यमपि तत्र नग्नतया नरीनृत्यति। तद्यथा सूर्यवाचकः केवल एक एव शब्दः 'सन' (Sun) इति। चन्द्रमसः कृतेऽपि एक एव केवलं 'मून'(Moon) इति। जलवाचीशब्दोऽपि एक एव 'वोटर' (Water) इति इत्थमेव सहस्रशः सन्ति शब्दाः तासु तासु भाषासु पर्यायान्तरबुभुक्षिताः। परन्तु संस्कृतशब्दकोशः खल्वपूर्वः। एकैकस्य वस्तुनोऽनेकानि नामानि विलसन्ति। यथा सूर्यस्य पर्यायवाचित्वेन- **'खगविहङ्गवियन्मणिभानवो हरिभगेननिदाघकराद्रयः। दिनमणिस्तरणिश्च-दिनप्रणीः।'** इत्यपूर्ण-श्लोकेनैव कियन्ति नामानि समुपश्लोकितानि। तदियमार्याणामस्माकं भाषेयं सर्वेतराढ्यत्वात् सर्वथा धन्या सर्वमान्या च भवति। स्थाने एवोक्तं केनापि कविनाः- ''अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारती।''

अन्यश्चापि एको हेतुरस्याः विश्वभाषापदवी योग्यत्वे। स चायं यद्भाषाया भूषणभूताः शोभाविधायका ये यमकानुप्रासश्लेषविरोधाभासादयः परस्सहस्त्रा अलङ्कारास्ते संस्कृतवाण्यां यथा समुपलालिता न तथा कस्यामपि इतरभाषायामुपलभ्यन्ते। इदमपरं महत्खलु वैशिष्ट्यं संस्कृतभाषाया भाषान्तरेभ्यः। एवमन्येऽपि समुत्कर्षाः संस्कृतभाषायाः समुल्लसन्ति न ते विस्तरभिया अत्र विविच्यन्ते।

तदेवञ्जातीयका बहवो हेतवो भवन्ति ये संस्कृतभाषाया विश्वभाषापदार्हत्वम्मुक्तकण्ठतः सडिण्डिमनादं निनदन्ति। या किल भाषा शक-हूण-यवनादिभि-र्भारतवर्षमात्मसात्कुर्वद्भिः, या च किल व्यवहारभाषातोऽपि बहिष्कुर्वद्भिः शतधाऽवहेलिता, या च पुनः राजकीयभाषासु नैपुर्णी सम्पादयद्भिः केवलमात्रमर्थार्जनपरैः पार्थिवभोगप्रवणैरुदरम्भरिभिर्भारतीयैरपि नेयमर्थकरी विद्येति कृत्वा चिरादनादृताऽपि पङ्के गौरिवावसीदन्ती आसेतु हिमाचलमद्यापि केनापि भास्वरेण प्रभावेण दीव्यन्ती राजतेतराम्। नूनं ते विप्रकुलावतंसा मानवहंसा भूसुरा अत्रास्माकं कोटिशः धन्यवादानर्हन्ति यैः सत्यपि वृत्तिकार्श्ये, भौतिकान् भोगानवहेल्य गायत्रीपुरश्चरणपरायणैरेव मधुकरीं वृत्तिमालम्ब्यापि, **'गोपाय मां शेवधिष्टेऽहमस्मी'**ति सरस्वत्यादेशं परिपालयद्भिः एष विद्याशेवधिः परिरक्षितः प्राणपणेनाऽपि।

सेयं भव्या दिव्या प्रौढा चाऽमरवाणी इदानीं सम्प्राप्ते हि स्वातन्त्र्यस्योदयकाले[१] विश्वजनहिताय, सांस्कृतिकैक्यप्रतिष्ठापनाय, विश्वस्मिन् जगति चार्यसंस्कृतेः पुनः प्रसाराय, संस्कृतानुरागिभिर्विद्वद्भिः प्रशासनेन च सा भूयस्तरमुपबृंहणीया, अनुप्राणयितव्या, विश्वभाषापदवीञ्चोपलम्भनीयेत्यस्माकं हार्दिकी अभ्यर्थना विद्वत्तल्लजेभ्यः गीर्वाणवाक्प्रणयिभ्यो भारतीयेभ्य इव वैदेशिकेभ्योऽपि।

एतच्च संस्कृतसाहित्यं मन्यामहे विश्वैकसाम्राज्यसंस्थापनाय, विश्वबन्धुत्वोज्जीवनाय, विष्वक् शान्तिसुरतरुसमारोपणाय च अस्ति किमपि मानवेभ्यो भगवदुपायनीकृतं दिव्यतमन्नाम तत्त्वम्। अत एवेदानीं सा खलु देववाणी लोकहितकाम्यया सर्वैः सम्भूय सर्वप्रयत्नेन पुनः समुद्धरणीयेति।

तादृशस्य महतोऽस्य संस्कृतवाङमयस्य संरक्षणं, संवर्द्धनं, सदनुसन्धानं, गभीरगवेषणञ्च सर्वेषां विदुषामेदम्प्राथम्येनानुष्ठेयं कर्त्तव्यमस्ति विशिष्य तु भारतीयानाम्।

१.नूनं क्रैस्त १९४७ तमः सम्वत्सरोऽयं भारतस्येतिवृत्ते स्वर्णाक्षरैरुल्लिखितो भवेत् तत्रापि अगस्तमासस्य १५ तमस्य दिवसस्य निशीथकालः यदा भारतीयैः दिष्टया सर्वाङ्गपूर्णं स्वातन्त्र्यं भगवदनुकम्पया स्वतपःपुण्यप्रभावेण च समुपलब्धम्।

# काव्यहेतुः

-आचार्यः शिवदत्तः द्विवेदी (अयोध्या)

प्रतिभैव काव्यस्य प्रधानतमं साधनमित्याह आचार्यो **भामहः**। भामहस्तु प्रावोचत् यत् आचार्योपदेशमधिगम्य सामान्योऽपि शास्त्रतत्त्वमवैति किन्तु कविताया: निर्माणं तु कश्चन प्रतिभासम्पन्न एव पुरुष: कर्तुं क्षम:। प्रतिभाया अभावे काव्यनिर्माणम् सर्वथा असम्भवमेव। तथाहि-

**'गुरुपदेशादध्येतुं, शास्त्रं जडधियोऽप्यलम् ।**
**काव्यं तु जायते जातु, कस्यचित् प्रतिभावतः ।।**

प्रतिभासम्पन्न एव कवि: निरवद्यं काव्यं कर्तुमलम्। दोषयुक्तस्य काव्यस्य प्रणेता कविस्तु तथैव निन्दनीयो भवति येन प्रकारेण दुष्टेन पुत्रेण द्वारा पिता निन्दनीयतां याति । तथाहि-

**'सर्वथा पदमप्येकं, न निगाद्यमवद्यवत्।**
**विलक्ष्मणा हि काव्येन, दुःसुतेनेव निन्द्यते ।।इति।।**

कुकवित्वस्य निन्दनीयता प्रतिपादयन् आचार्यो भामह: प्राह यत् कवित्वाभावो न तु दण्डनाय भवति न वा व्याधये भवति नवाऽधर्माय भवति, किन्तु कुकवित्वं तु साक्षात्मृत्युरेव । तथाहि-

**'अकवित्वमधर्माय व्याधये दण्डनाय वा।**
**कुकवित्वं पुनः साक्षात् मृतिमाहुर्मनीषणः ।।इति।।**

अनेन प्रकारेण प्रतिभैव काव्यस्य सर्वोत्तमं साधनं वर्तते। तामिमां प्रतिभां निरुपयन् आचार्यो **भट्टतौतः** प्राह-

**'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता'** ।।इति।।

आचार्यस्य **कुन्तकस्य** मतानुसारेण तु-

'प्राक्तनाद्यतनसंस्कारपरिपाकप्रौढा प्रतिभा काचिदेव कविशक्तिः'।

आचार्यो **वामनस्तु** प्रतिभाया: स्वरुपं निरुपयन्नाह-

**कवित्वबीजम् प्रतिभानम्** ।। १/३/१६

**कवित्वस्य बीजम् कवित्वबीजम्, जन्मान्तरागतः**

संस्कारविशेषः कश्चित्। यस्माद् विना काव्यं न निष्पद्यते।

निष्पन्नं वा हास्यायतनं स्यात्।

(काव्यालङ्कारसूत्रवृत्तिः-**वामनः**)

**राजशेखरस्तु** काव्यमीमांसायामाह यत् कविता सा शक्तिविशेषो वर्तते या कविहृदये-शब्दसमूहं, अर्थसमूहं, किं मार्गम् धान्यां च काव्यसामग्री प्रतिभासयति। प्रतिभाहीनाय पदार्थाः परोक्षाः भवन्ति, किन्तु प्रतिभासम्पन्नो नेत्रहीनोऽपि पदार्थान् प्रत्यक्षयन्निव वर्णयति।

**भट्टगोपाला**नुसारेण प्रतिभा कवित्वस्य बीजम् वर्तते। येन प्रकारेण वृक्षं वीक्ष्य तस्य बीजस्यानुमानं क्रियते तेनैव प्रकारेण काव्यरुपं कार्यं दृष्ट्वा तस्य वासनारुपस्य कारणस्यानुमानं क्रियते।

एतेषां समेषामाचार्याणां मतानुसारेण प्रतिभा नाम कश्चन जन्मान्तरीयः संस्कारविशेष एव।

भामहानन्तरमाचार्यो **दण्डी** काव्यसाधकहेतुषु प्रतिभया साकम् शास्त्रज्ञानाभ्यासयोरपि आवश्यकता प्रत्यपीपदत्। तथाचोक्तं काव्यादर्शे-

**नैसर्गिकी च प्रतिभा, श्रुतञ्च बहुनिर्मलम् ।**

**अमन्दश्चाभियोगश्च, कारणं काव्यसम्पदः ।। इति।**

प्रतिभा तु पूर्वजन्मवासनाश्रिता भवति। दण्डिनः मतानुसारेण प्रतिभारहितोऽपि पुरुषः शास्त्रज्ञानेन द्वारा अभ्यासेन च द्वारा सरस्वत्याऽनुगृहीतो भवति। तदा भवति च काव्यकर्ता। तथाहि-

**'न विद्यते यद्यपि पूर्ववासना, गुणानुबन्धि प्रतिभानमद्भुतम्।**

**श्रुतेन यत्नेन च वागुपासिता, ध्रुवं करोत्येव कमप्यनुग्रहम् ।।' इति।**

आचार्यो **वामनस्तु** प्रतिभां प्रतिभानशब्देनाभिधत्ते। प्रतिभानमेव कवित्वबीजम्। काव्यपरिचय-काव्यरचनोद्योग-गुरुशुश्रूषा-विविधशास्त्राणां ज्ञानानि च काव्याभिव्यक्तिसाधनानि भवन्तीति प्राहाचार्यो वामनः। किञ्च चितैकाग्र्यरुपमवधानमपि काव्याभिव्यक्तिसहायकम्। तथा चोक्तमपि **वामनेन** काव्यालङ्कारे-

'तत्र काव्यपरिचयो लक्ष्यज्ञत्वम्। काव्यबन्धोद्यमोऽभियोगः। काव्योपदेश-गुरुशुश्रूषणं वृद्धसेवा। पदाधानोद्धरणमवेक्षणम्। कवित्वबीजम् प्रतिभानम्। चित्तैकाग्र्यमवधानम्। तद्देशकालाभ्याम्।' इति।

आचार्यो **रुद्रटानुसारेण** सम्मिलितः-प्रतिभाव्युत्पत्यभ्यासाः काव्यहेतुः। प्रतिभायाः स्थाने सः शक्ति स्वीकरोति शक्तिरेव काव्यस्य प्रधानहेतुः। सः प्राह काव्यालङ्कारे-

**'मनसि सदा सुसमाधिनि, विस्फुरणमनेकधाभिधेयस्य।**
**अक्लिष्टानि पदानि च, विभान्ति यस्यामसौ शक्तिः ।।'**

**आनन्दवर्धनाचार्या**नुसारेण तु प्रतिभाव्युत्पत्त्योः प्रतिभैव काव्यस्य श्रेष्ठं साधनम्। शास्त्रव्युत्पत्ति-रहितस्य काव्ये बहवो दोषा जायन्ते। किन्तु प्रतिभा इमान् सर्वान् दोषानपाकरोति। दोषास्तु अशक्त्याऽपि भवन्ति अव्युत्पत्त्याऽपि भवन्ति किन्तु अशक्तिजन्यो दोषस्तु जघन्यो भवति। तथाहि-

**'अव्युत्पत्तिकृतो दोषः, शक्त्या संव्रियते कवेः।**
**यस्त्वशक्तिकृतस्तस्य झगित्येवावभासते ।।' इति।**

किन्त्वाचार्यो **मङ्गलः** व्युत्पत्तिमेव काव्यस्य श्रेष्ठं साधनं स्वीकरोति। व्युत्पत्तेरर्थो बहुज्ञता वर्तते। व्युत्पन्नस्य कवेः सर्वासु दिक्षुरव्याहता गतिर्भवति।

**राजशेखरस्तु** काव्यमीमांसायां वक्ति यत् **श्यामदेव**नामकस्याचार्यस्य मतानुसारेण तु समाधिरेव काव्यस्य श्रेष्ठं साधनम्। तथाहि-

**काव्यकर्मणि कवेः समाधिः परं व्याप्रियते इति श्यामदेवः।।**

समाहितमेव चित्तमर्थोन्मीलनकरं भवति। मनोयोगेनाराधयितुरेव चित्ते सारस्वतरहस्यस्योन्मेषो जायते। तदर्थं चितैकाग्र्यमनिवार्यमिति प्रतिपादयन् **राजशेखरः** प्राह-

**सारस्वतं किमपि तत्सुमहारहस्यं,**
**यद् गोचरे च विदुषां निपुणैकसेव्यम्।**
**तत्सिद्धये परमयं परमोऽभ्युपायो,**
**यच्चेतसो विदितवेधविधेः समाधिः ।।इति।।**

किन्तु स्वयम् आचार्य**मङ्गल** अभ्यासस्य काव्यकर्मणि महत्त्वं स्वीकरोति। राजशेखरः शक्तिमेव काव्यनिर्मितौ प्रधानसहायिकां स्वीकरोति। समाध्यभ्यासौ तु शक्तेरुद्भासकौ स्तः राजशेखरानुसारेण। भक्तेः विस्तारश्च प्रतिभया व्युत्पत्त्या च भक्त्या च प्रतिभाव्युत्पत्त्योर्विकासो भवति।

राजशेखरः प्रतिभायाः द्वौ भेदौ स्वीकरोति-कारयित्री प्रतिभा भावयित्री प्रतिभा च। काव्यकर्मणि कवेरुपकारिणी प्रतिभा कारयित्रीत्यभिधीयते। अस्यैव कविः शब्दार्थयोर्मनोज्ञं गुम्फं सहृदयानां समक्षमुपस्थापयति। भावयित्री प्रतिभया च भावकः कवेः श्रमस्य महत्त्वं जानाति।

राजशेखरमतानुसारेण कारयित्र्याः प्रतिभायाः त्रयो भेदाः भवन्ति-सहजाऽहार्यौपदेशीकी च। पूर्वजन्मसंस्कारवशादिह जन्मनि अल्पेनैव प्रयासेनोद्बुद्धा प्रतिभा सहजेत्यभिधीयते। जन्मसंस्काराभ्यां जन्या अभ्यासाधेयातिशया प्रतिभाऽहार्येत्यभिधीयते। औपदेशिकी तु प्रतिभा मन्त्रतन्त्रादीनामुपदेशाद्भवति।

आचार्यस्य मम्मटस्य मतानुसारेण काव्यकर्मणि शक्तिनिपुणताभ्यासाः सम्मिलिता एव हेतुः।

# भाषावैज्ञानिकमर्थविज्ञानम्

**-आचार्यः शिवदत्तः त्रिवेदी**

येभ्यो वक्तृणां मानसिको भावोऽवगम्यते क्रियायास्तानि रुपाणि अर्थशब्देनाभिधीयन्ते। यथा-त्वमुपविश अत्राऽज्ञा प्रतीयते। अर्था इमे प्रधानतया पञ्चधा भवन्ति। निश्चयार्थका अर्थाः, सम्भावनार्थकाः, सन्देहार्थकाः, आज्ञार्थकाः सङ्केतार्थकाश्च।

अर्थस्य दृष्ट्या प्रत्येकस्य पदस्य योह्यर्थो भवति सः अर्थ इत्यभिधीयते। पदार्थ एवार्थशब्दवाच्यो भवति। बेली (Bally) नामको भाषावैज्ञानिकः अर्थतत्त्वम् शुद्धं कोषजन्यार्थबोधकं प्रतीकविशेषं मनुते। अर्थविज्ञानस्यैवापरं नामार्थतत्त्वमस्ति।

अयमर्थः सर्वदा परिवर्तितो भवति एकस्य शब्दस्य कालभेदादर्थोऽपि भिद्यते। यथा-प्राचीने काले अभियुक्तशब्दस्यार्थः प्रामाणिक आसीत् किन्तु कालान्तरवर्तमाने काले अभियुक्तशब्दस्य सापराधपुरुषस्यार्थे प्रयोगो भवति। इदमर्थपरिवर्तनमेवार्थ-विकासशब्देनाथवार्थविकारशब्देनाभिधीयते।

अस्यार्थपरिवर्तनस्य तिस्रो दिशः भाषावैज्ञानिकैः निरुपितः-अर्थविस्तारः, अर्थसङ्कोचः अर्थादेशश्च। एतद्व्यतिरिक्ताः केचन तादृशा अपि शब्दाः समुपलभ्यन्ते येषु अर्थस्योत्कर्षो दृश्यते अथवा अर्थस्यापकर्षो दृश्यते।

सांस्कृतिकेन विकासेनैव साकम् भाषयोः प्रत्येकाङ्गोपाङ्गेषु परिवर्तनं जायते। पूर्वतो विद्यमानानामेव शब्दानाम् नवीनेषु अर्थेषु प्रयोगो भवति। तेषु तेषु नवीनेषु शब्दानाम् व्यवहारप्रवर्तका आचार्या एव भवन्ति। तथा चोक्तम् महाभाष्ये-

**आचार्याचारात् संज्ञासिद्धिः। आचार्याणां व्यवहारात्। इहापि कृतः पूर्वैरभिसम्बन्धः। कैः? आचार्यैः?**

तासामर्थपरिवर्तनस्य तिसृणाम् दिशाम् मनाङ्विवेचनमधस्तात् क्रियते-

**(१) अर्थविस्तारः** - शब्दानामर्थस्य विस्तारो भवति। तेषां मौलिक अर्थस्तु स्थित एव भवति, पुनस्तस्यार्थस्य विस्तारो भवति। यथा-अभ्यासशब्दः पूर्वम् बाणप्रक्षेपणाभ्यासाय प्रायुज्यत। तथा चाह भट्टहलायुधः-

**"बाण भुक्तिर्व्यवच्छेदो, दीप्तिर्वेगस्य तीव्रता ।**
**अभ्यासः कथ्यते योग्या, श्रमस्थानं खलूरिका ।।"**

किन्तु साम्प्रतम् सर्वप्रकारकाणां कार्याणामभ्यासः अभ्यासशब्देनाभिधीयते। अनेनैव प्रकारेण तैलशब्दः तिलजन्यस्य स्नेहमात्रस्य वाचक आसीत् किन्तु साम्प्रतम् अस्य शब्दस्य सर्वप्रकारकबीजरसाय क्रियते। यथा-सर्षपतैलम्, विषतैलम्, सर्पतैलम् इत्यादिकम्।

**डॉ.तारापुरवाला** महोदयस्यानुसारेण विशिष्टे शब्दे सामान्यस्यार्थस्य स्थापनमेव अर्थविस्तार इत्यभिधीयते। अत्रार्थविस्तारस्य कानिचनोदाहरणानि प्रस्तूयन्ते-

| **शब्दः** | **मौलिकः अर्थः** | **विस्तृत अर्थः** |
|---|---|---|
| गवेषणा | गोरन्वेषणम् | शोधकार्यम्, अन्वेषणम्। |
| प्रवीणः | वीणावादन चतुरः | चतुरः । |
| द्रव्यम् | काष्ठनिर्मितं वस्तु | धनम्, गुणाश्रयः पदार्थः। |

(२) **अर्थसंकोचः**-अर्थसङ्कोचे शब्दस्यार्थो न्यूनायते। यथा-प्राक् गोशब्दः चरतां समेषां प्राणिनाम्, इन्द्रियाणाम्, वेदवाणीनाम्, गवाम् रश्मीनां च कृते प्रायुज्यत, किन्तु वर्तमाने काले गोशब्दस्य प्रयोगः गोत्वावच्छिन्नाय प्राणिविशेषाय कृते भवति। वेदना शब्दः पूर्वकाले सर्वप्रकारकस्य ज्ञानस्य वाचक आसीत् किन्तु वर्तमानकाले अस्य शब्दस्य प्रतिकूलप्रतीतिरुपाय दुःखायैव भवति।

**डॉ. मङ्गलदेवशास्त्री** अर्थसङ्कोचस्य निम्नाङ्कितान्युदाहरणान्युपन्यस्तवान्-

| **शब्दः** | **मौलिकार्थः** | **संकुचितार्थः** |
|---|---|---|
| वेदः | सर्वविधाः विद्याः | ऋग्वेदादिकाश्चत्वारो वेदाः |
| पर्वतः | पर्ववान् मेघः पर्वतः | पर्वतः |
| यात्रा | कुत्रापि गमनम् | तीर्थाटनम् |
| वरम् | अभ्यर्थितं वस्तु | वरः |
| पयः | दुग्धम् जलञ्च | दुग्धम् |
| धान्यम् | अन्नमात्रम् | धान्यम् |

अर्थसङ्कोचोऽनेकधा भवति। अर्थस्य सङ्कोचः अथवा अर्थस्य विशेषावस्थानम् समासे भवतीत्याह **भर्तृहरिः** यथा-अब्भक्षः, वायुभक्षः, कर्णेजपः, त्र्यम्बकः, कण्ठेकालः, पश्यतोहरः इत्यादिषु शब्देषु।

किञ्चोपसर्गस्य संयोगेनापि अर्थसङ्कोचोऽथवा विशेषावस्थानं भवति। यथा-आहार-विहार-संहार-विहारादिषु। अनेनैव प्रकारेण भूधातोरपि उपसर्गसम्बन्धेन प्रभावानुभाव-विभाव-सम्भावादिषु शब्देषु ऊहनीयम्।

विशेषणानामपि संयोगेनार्थसङ्कोचो भवतीति दृश्यते। यथा-शुक्लो पटः, शुक्लो गौः शुक्लोऽश्वः इत्यादिषु। अत एव हि विशेषणानामर्थसङ्कोचकत्वरुपं व्यावर्तकत्वं स्वीक्रियते। तथा चोक्तं महर्षिणा **पतञ्जलिना-**

**'सर्वश्च शब्दोऽन्येन शब्देनाभिसम्बध्यमानो विशेषवचनः सम्पद्यते।'** इति।

महर्षिणा पतञ्जलिनाभिहितम् यत् शब्दानामर्थाः लोकप्रसिद्धिमप्याश्रित्य संकुचिता भवन्ति। तथाहि-

**'युक्तं पुनर्यत् नियतविषया नाम शब्दाः स्युः। बाढं युक्तम्। अन्यत्रापि नियतविषयाः शब्दाः दृश्यन्ते।'** इति।

**(३) अर्थादेशः-डॉ.देवेन्द्रनाथशर्मा** लिखति यत् आदेशशब्दस्यार्थः परिवर्तनम् वर्तते। अर्थादेशे शब्दस्यार्थः संकुचितः अथवा विकसितो नहि भवति अपि तु तस्यार्थस्य स्थाने अर्थान्तरमायाति। अर्थादेशात् प्राक् शब्दः कस्यचन अन्यस्यार्थस्य वाचको भवति, अर्थादेशे जाते च तस्माद्भिन्नस्यैवार्थस्य वाचको भवति। यथा-वेदेषु असुरशब्दः देवानाम् वाचक आसीत् परन्तु परवर्तिसाहित्ये सोऽयं शब्दः दैत्यानाम् वाचको बभूव। अभियुक्तशब्दः पूर्व प्रामाणिकस्य अथवाप्तपुरुषस्य वाचकः आसीत् किन्तु परिवर्तिकाले सोऽयं शब्दः सापराधस्य पुरुषस्य वाचको वभूव।

अत्र **डॉ. भोलानाथ तिवारी** महोदयो लिखति यत् भावसाहचार्यवशात् कदाचित् शब्दस्य प्रधानेनार्थेन साकम् गौण अप्यर्थः प्रचलितो भवति। कालक्रमेण तस्य शब्दस्य प्रधान अर्थो लुप्यते, गौण एवार्थः प्रचलितो भवति। इत्थम् एकस्य अर्थस्य लोपे सपि नवीनस्यार्थस्य प्रचलनमेव अर्थादेश इत्यभिधीयते।

**डॉ. मङ्गलदेव शास्त्री** अर्थादेशस्य त्रीन् पर्यायवाचिनः शब्दान् निर्दिष्टवान् अर्थान्तरणम्, अर्थसंक्रमणम् अर्थविपर्ययश्च। सः अर्थादेशस्य निम्नाङ्कितान्युदाहरणानि उपस्थापयामास-

| **शब्दः** | **मौलिकार्थः** | **नवीनार्थः** |
|---|---|---|
| अनुग्रहः | साहाय्यकरणम् | दया। |
| अनुक्रोशः | कस्यचन रोदनानन्तरं रोदनम् | सहानुभूतिः। |
| गौः | पशुः | किरणानि, पृथ्वी |
| शुश्रूषा | श्रोतुमिच्छा | सेवितुमिच्छा |

अर्थस्य परिवर्तनमर्थोत्कर्षापकर्षाभ्यामपि सम्भवति-अर्थोत्कर्षविषये डॉ. भोलानाथ तिवारी महोदयो लिखति यत् शब्दा उन्नताः भवन्ति। यथा पूर्वं मुग्धशब्दः मूढस्य वाचक आसीत् किन्तु साम्प्रतम् मुग्धशब्दस्य मनोज्ञरुपेऽर्थे भवति प्रयोगः।

**(४) अर्थापकर्षः**-समयानुसारेण अर्थस्य परिवर्तनम् अर्थापकर्षरुपेणापि भवति। यथा-वेदेषु असुरशब्दस्यार्थः देवता अथवा सूर्यः आसीत् किन्तु परवर्तिकाले सोऽयं शब्दः राक्षसस्य वाचको बभूव। अयमेवार्थापकर्षो वर्तते शब्दस्य ।

# संस्कृतभाषायां लेखनं न सुकरम्

- देवर्धिः

**संस्कृतभाषाया आनन्दमनुभवितुं बहवो मार्गाः सन्ति।**

१. संस्कृतभाषाया अभ्यासः।

२. संस्कृतभाषायाः शास्त्रीयशैली शिक्षणम्।

३. संस्कृत-भाषाया गद्य-पद्य-चम्पू-नाटय-प्रमुख-साहित्यस्य पठनम्।

४. संस्कृतभाषाया अध्यापनम्।

५. संस्कृतसाहित्यस्य-अध्यापनम्।

६. संस्कृतभाषायां वार्तालापः।

७. संस्कृतभाषायां लेखनम्।

८. संस्कृतभाषायां रसालंकारसमृद्धकाव्यनिर्माणम्।

९. संस्कृतभाषायां टीका-विवरणादि-विरचनम्।

नव प्रकारोऽयं मार्गः। प्रत्येकोऽपि मार्गः प्रज्ञाविशेषमपेक्षते। संस्कृतभाषाया अभ्यासे धातु-रुपाणां, शब्दरुपाणां, सन्धि-समास-तद्धितादि-प्रयोगाणां बोधो जायते। शास्त्रीयशैली शिक्षणे पुनः विचारविस्तारविधायका विविधा वाक्यरचनाप्रकाराः, तर्कप्रतितर्कदक्षाः चर्चा-सन्दोहाश्च गंभीरतापुरस्सरं, कुशलशिक्षकसमीपेऽधीयन्ते। शब्दालंकार-अर्थालंकार-रसयोजना-समन्वितं साहित्यमपि पठयते भाषावैभवानुभवार्थम्। अथ भाषायाः साहित्यस्य च अध्यापनम् अतीववैशारद्यमादधान एव कर्तुमलम्। वार्तालापोऽपि तदर्थमेव सुकरो यो नाम स्पष्टबोधः। अभ्यासादारभ्य वार्तालापपर्यन्तं षट्प्रकारो मार्गः सन्नपि कठिनो नाधिकं काठिन्यं वहति। लेखनादारभ्य यावन्तो मार्गाः सन्ति तेषु काठिन्यमस्ति। यो नाम षडविधमार्गपथिकोऽभवत् स यदि विचारयति यद् - अहं लेखने समर्थोऽस्मि - तर्हि समस्या समापद्यते । यतो हि लेखनं हि प्रतिभाविशेषादेव सुन्दरं जायते। यो नाम संस्कृतं जानाति सोऽयं संस्कृतलेखनाय समर्थो वर्तते-इति नियमो नास्ति। लेखनार्थं तु परमकृपा (Good Gift) प्राधान्येन सर्वदा अपेक्ष्यते। यथा गुर्जरीभाषां जानन् सर्वोऽपि जनः गुर्जरीभाषाया लेखको नास्ति। तथैव संस्कृतविषयेऽवगन्तव्यम्। किञ्च-गुर्जरीभाषायां लेखनमात्रेण यथा तस्य सामर्थ्यं सिद्धं न भवति, अपितु लेखनवैशिष्ट्यादेव तत् सिध्यति। एवं संस्कृतभाषायां लेखनमात्रेण न लेखकस्य कस्यचिद् गौरवं भवति, अपितु लेखन-वैशिष्ट्यादेव तत् संपाद्यते। अतो यत्र प्रतिभाजनितं लेखन-वैशिष्ट्यमस्ति तत्रैव साहित्यकारत्वं मन्यते। प्रतिभाविकलं लेखनं न तथा सन्मानितं भवति। लेखनं यः करोति तस्य यशोवादो भवति इति नास्ति। लेखनं यस्य विशिष्टमस्ति तस्यैव यशोवादो भवति। यस्य लेखनं विशिष्टं नास्ति तस्योपेक्षा भवेद् निन्दा वा स्याद्।

संस्कृतभाषायां लेखने प्रारब्धे यत्र या क्षति:संभाव्यते तत् पश्यामो यत्किंचित्।

१. लेखको लोकभाषां गूर्जरी-हिन्दी-प्रमुखां मनसि धारयन्, मनसि धारयन् प्रारभते वाक्यरचनाम्। अयं नाम वाक्यं निर्माति संस्कृतभाषायां, छाया चापतति लोकभाषाया: यथा-

तमे केम छो ? - इति गूर्जरभाषां विचारयन् विद्वान् प्रस्तौति - यूयं कथं स्थ । इति। अत्र व्याकरणं शुद्धं वर्तते। भाषा तु नास्ति प्राञ्जला। लेखनकुशलो व्याहरेत् - कथमास्ते भवान् - इति। संस्कृतभाषाया: स्वातंत्र्यं स्वत एव येनानुभूयते तदेव लेखनमिति स्पष्टम्।

२. कर्ता च क्रिया चेति वाक्यरचनाया: साधनद्वयम्, कर्ता यदि एकवचने वर्तते तर्हि क्रिया अपि एकवचने भवति। साधारणोऽयं नियमो नितमां चूर्णितो भवति सावधानेतराणां लेखनेषु। एवमेव कर्तरिवाक्ये कर्मण: द्वितीयपुरुषप्रत्ययो भवति - इति नियम:। कर्मणिवाक्ये च कर्मण: प्रथमपुरुषप्रत्ययो भवतीति नियम:। कर्मणि वाक्ये कर्मण: वचनं क्रियाया वचनं भवतीति सुज्ञातम् । कर्मण: एकवचनं क्रियाया अपि एकवचनत्वमातनोति। असावधान: रामेण शत्रव ताडिता:। इति शुद्धं वाक्यं विस्मृत्य - रामेण शत्रव: ताडित: इति वाक्यम्। अत्र कर्तरिवाक्यस्य छाया - राम: शत्रून् ताडितवान् इत्यस्य।

३. बहव आधुनिका: शब्दा: संस्कृतभाषायां स्वीकृता दृश्यन्ते। परन्तु-लोकभाषाप्रयुक्तानां शब्दानां यथेष्टमुपयोगो नाद्यापि निरवद्यकक्षां धारयति। कोम्प्युटर इत्ययं शब्द स्वीकृतो दृश्यते, तस्य भाषान्तरं च गणयंत्रं इति जातमस्ति। परंतु रसोडु, माथुं इत्यादिका शब्दा समजवुं फरवुं इत्यादिकाश्च क्रिया:-शब्दरुपेण स्वीकार्या: न सन्ति। तेषामनुवाद एव कर्तव्य:।

अन्यथा छोकरा: न डरन्ति। इत्यादिका विकृतिरापद्यते। अयं तस्यानुवादो गूर्जर्याम् - छोकराओ डरता नथी.

४. वाक्यरचने कर्तु: कियायाश्च प्रयोगो भवति। सर्वा एव क्रिया: केवलं कर्तरिवाक्येन प्रस्तूयन्ते नवोदितेन। वस्तुत: वाक्यरचनायां कर्तृक्रियासम्बन्धो विविध प्रकारेण प्रस्तोतुं पार्यते। यथा

१. **अहं जलं पिबामि** इति वाक्यं पश्यन्तु। इदं नाशुद्धं वर्तते। परंतु कर्मणिप्रयोगेन सुन्दरत्वं साध्यते। यथा-

२. **पीयते मया जलम्।** कर्मणि प्रयोगस्य वाक्यं हि लेखकस्य वैदुष्यं भाषाया: परं वैशिष्ट्यं च दर्शयति इदमेव वाक्यम् अथ कृदन्तेऽपि साध्यते।

३. **यथा पिबन्नस्मि जलम्।** अत्रापि नूतनोन्मेषो वर्तते भाषाया: ।

एवं वाक्यवैविध्येन भाषासौन्दर्यं भवति। साधारणो लेखको नैतद् विधातुं समर्थो भवति। तदर्थं परमकृपा नूनं सदाऽनिवार्या।

५. गद्यपद्यलेखनं, यथोचितमलंकारप्रयोगश्च काव्यरचनार्थं यदा लक्ष्यं भवति तदा लेखको यदि कुशलो न स्यात्तदा च, का समस्या जायते तदवलोक्यम्। छन्दोविधानं तद्बन्धश्चेति पठित्वा श्लोकं रचयन्- छन्दपूर्तये क्वचिद् निरुपयोगिनां अवयवानां निक्षेपं करोति। क्वचित् पुन: क्रियापदात् पूर्वं व्यर्थानाम् उपसर्गाणां निवेशं कुरुते। क्वचित्तु तथा शब्दावलिं स्थापयति यस्या:कल्पनाऽपि विदुषां नास्ति।

६. काव्यं रचयन्, शास्त्रं च विवृण्वन्-लेखको रसस्य विषये, पदार्थस्य च विषये यदि स्पष्टो नास्ति तर्हि काव्यं काव्यं न भवति, विवरणं च विवरणं न भवति।

७. नियमितरुपेण शास्त्राणां काव्यानां च स्वाध्यायमकुर्वाणो नोत्कृष्टं लेखनं कर्तुं क्षम:। बहुग्रन्था-भ्यासानन्तरं च संभवति चौर्य-च्छायाग्रहणादिकं दूषणम् इति उभयत्र परीक्षा सर्जकस्य।

नवीना लेखका: सन्मानिता भवन्तु इति मतमस्माकम् । केवलं सर्वेऽपि संस्कृतज्ञा लेखककक्षामारुढा भवितुं नार्हन्तीति चिन्ताऽस्मदीया। भवतु संस्कृतभाषायां उत्तमानां लेखकानामभिवृद्धिरित्यभिलाषा शुभा।

# सिद्धाचलस्तवनम्

-मुनिश्री मोक्षरतिविजयाः

(ईश्वर सत्य हैं...सत्यम् शिवम् सुंदरम्)

(पूर्वोक्तिः)

✻ वन्दे सिद्धगिरिं वन्दे विमलगिरिं शत्रुंजयगिरिम्
वन्दे शाश्वतगिरिं वन्दे मुक्तिनिलयगिरिम्

**(गीतिः)**

**विमलाचलं वन्दे**

**✻ सकले विश्वे(२) गिरिसमतीर्थं, नैवैवं कथयन्ति-**
**अर्हन्तस्तद्गिरियात्रायै(२), चरणानि त्वरयन्ति**
**शरणागतो नन्दे**

**✻ धर्मसाधना(२) विहिता दत्ते, यत् तीर्थेष्वन्येषु**
**फलमयमचलस्तदनन्तगुणं (२) धृतमात्रो नयनेषु**
**मग्नोऽहमानन्दे**

**✻ आयाता इह...हो(२) आयास्यन्ति, अर्हन्तोऽमृततनवः**
**अन्तविहीना जीवाः सिद्धा(२), अत्र वहन्ति तदणवः**
**मज्जामि निष्यन्दे**

# दर्भावती तीर्थाधिनाथ
# श्री लोढणपार्श्वजिन-स्तुत्यष्टकम्

- आचार्यविजयराजरत्नसूरीश्वराः
(पूज्याचार्यश्रीविजयधर्मसूरीश्वर समुदायवर्ती)

**(उपजातिछन्दः)**

दर्भावतीमण्डलमण्डनं यो, निःशेषभूमीतल - भूषणं यः ।
स्वरूपसम्पत्तिनिकेतनं यस्तं लोढणं पार्श्वजिनं स्तुवेऽहम् ।।१।।
ध्यायन्ति यं तीर्थपतिं मुनीन्द्राः, स्तुवन्ति यं सर्वसुरासुरेन्द्राः ।
भजन्ति यं भक्तियुता नरेन्द्राः तं लोढणं पार्श्वजिनं स्तुवेऽहम् ।।२।।
रत्नत्रयी येन सुसाधिता च, तत्त्वत्रयी येन निरूपिता च ।
विश्वत्रयी येन विवर्णिता च, तं लोढणं पार्श्वजिनं स्तुतेऽहम् ।।३।।
सदैव भक्ताः प्रणमन्ति यस्मै, स्तवादिना विज्ञपयन्ति यस्मै।
पूजादिभक्त्या स्पृहयन्ति यस्मै, तं लोढणं पार्श्वजिनं स्तुवेऽहम् ।।४।।
भवन्ति यस्मात् खलु मङ्गलानि, भवेच्च यस्मात् खलु कर्महानिः ।
यस्माच्च शर्माणि शिवावहानि, तं लोढणं पार्श्वजिनं स्तुवेऽहम् ।।५।।
शीर्षे स्थिताः सप्त फणा हि यस्य, विभ्राजते श्यामतनुश्च यस्य।
पद्मासनार्धं विरलं हि यस्य, तं लोढणं पार्श्वजिनं स्तुवेऽहम्।।६।।
भ्राजन्ति यस्मिन् सुगुणाः सदैन्द्राः, पश्यन्ति यस्मिन् स्वदशां मुनीन्द्राः।
दोषाश्च यस्मिन् न भवन्ति सान्द्राः, तं लोढणं पार्श्वजिनं स्तुवेऽहम् ।।७।।
यत्संस्तवो दुष्कृतखण्डकश्च, यत्संस्तवः सत्कृत-सर्जकश्च।
यत्संस्तवो मङ्गलदायकश्च, तं लोढणं पार्श्वजिनं स्तुवेऽहम् ।।८।।

**उपसंहारः**

सूरीशसूर्योदय - सेवकेन, शिष्येण राजान्वितरत्नकेन ।
दर्भावती - तीर्थपतेः प्रशस्तिः, कृता जनानन्दकरी चकास्ति ।।१।।

* अष्टकस्यास्य प्रारम्भिकानां सप्तानां श्लोकानां त्रिषु त्रिषु चरणेषु क्रमशो यत्सर्वनाम्नः सप्तानामपि विभक्तिनामेकवचनरूपं त्रिः प्रयुक्तमस्ति ।

सपादशतविशेषणगर्भितम्

# श्री सिद्धमन्त्रस्तोत्रम्

**(उपजाति:)**

**-साध्वीश्री प्रशमनिधिश्री**

* ॐ देवदेवाय[१] हृदीश्वराय[२],
सिद्धाय[३] बुद्धाय[४] गुणेश्वराय[५], ।
श्री वीतरागाय[६] जिनेश्वराय[७],
नमो नम: श्रीपरमेश्वराय[८] ... ।।१।।

* दुर्मोहजीमूतप्रभंजनाय[९],
वीराय[१०] धीराय[११] निरञ्जनाय[१२],।
श्रेयोवधूमानसरञ्जनाय[१३]
नमोनमस्ते भवभञ्जनाय[१४] .... ।।२।।

* सद्भावनाध्वस्त-मनोमलाय[१५],
सद्ध्यानलब्धाऽमलकेवलाय[१६],।
सदा त्रिलोकीहितवत्सलाय[१७],
नमो नमो धैर्यसुराचलाय[१८] ... ।।३।।

* दुष्कर्मग्रीष्माऽऽतपनीरदाय[१९],
समस्तविश्वोत्तम[२०]-सारदाय,।
नम्राङ्गिनां शाश्वतसौख्यदाय[२१],
नमोनमस्तेऽखिलकामदाय[२२] ... ।।४।।

* भव्यासुमत्पद्मविरोचनाय[1][२३],
स्मरारिदाहैकत्रिलोचनाय[2][२४],।
संसारमायापरिमोचनाय[२५],
नमोनम: केवललोचनाय[२६] .... ।।५।।

टीप्पणकं :- 1. सूर्य: 2. शंकर:

* सदा जगद्भावविभासनाय[२७],
कल्याणस्वर्वल्लिविकाशनाय[२८]।
दुर्मोह - दौर्भाग्य-विनाशनाय[२९],
नमोनमस्ते शुभशासनाय[३०] ... ।।६।।

* कुरागदु[1]र्हृत्परिपेषकाय[३१],
निर्वाण[2]पद्या[३२] परिवेशकाय,।
सत्सौख्यसाम्राज्यप्रवेशकाय[३३],
नमोनम: वाङ्मयदेशकाय[३४] ...।।७।।

* धन्याय[३५] पुण्याय[३६] निरुपमाय[३७],
नम्राय[३८] कम्राय[३९] च निर्ममाय[४०],।
त्रैलोक्यनिस्तारणसक्षमाय[४१],
नमोनमस्ते जगदुत्तमाय[४२]... ।।८।।

* ध्येयाय[४३] सेव्याय[४४] गुणालयाय[४५],
श्रद्धा-[3]शिवास्रष्ट्[4]हिमालयाय[४६],।
सत्तीर्थसंस्थापितसन्नयाय[४७],
नमो नमो नाशितदुर्नयाय[४८]...।।९।।

* स्थिराय[४९] शूराय[५०] च निर्मलाय[५१],
भीमोपसर्गेषु सुनिश्चलाय[५२],।
पापाटवीदाहदवानलाय[५३],
नमोऽस्तदोषाय[५४] गुणोज्वलाय[५५] ... ।।१०।।

* सार्वाय[५६] साध्याय[५७] सुखाकराय[५८],
सच्चन्द्रिका[५९] चित्तनिशाकराय,।
भ्रान्तिनिशानाशविभा[5]कराय[६०],
नमो नमस्ते प्रशमाकराय[६१] ... ।।११।।

* वाङ्मेघतुष्टाश्रितचातकाय[६२],
कृपासुधापु[6]ष्करखातकाय[६३],।
अन्तर्द्विषत्स[7]न्तति घातकाय[६४],
नमो प्रणष्टाखिलपातकाय[६५] ... ।।१२।।

टीप्पणकं :- 1. शत्रु:, 2. दायक:, 3. पार्वती, 4. जनक:, 5. सूर्य:, 6. जलं, 7. समूह:

* दीव्याय[६६] भव्याय[६७] सुराऽऽनताय[६८],

सौम्याय[६९] काम्याय[७०] पराऽरताय[७१],।

स्वजन्मतो भूषितभारताय[७२],

नमोस्तु योगीश्वरवन्दिताय[७३] .... ।।१३।।

* रम्याय[७४] नम्याय[७५] च तारकाय[७५]

क्षमारमा[1]-मानस-हारकाय[७७],।

दर्पद्विषद्दास्यनिवारकाय[७८],

नमो नमो दैन्यनिवारकाय[७९]..... ।।१४।।

* स्तुत्याय[८०] शुद्धाय[८१] शुंभकराय[८२],

नमो शरण्याय[८३] शिवंकराय[८४],।

नमोऽस्तदंभाय[८५] प्रियंकराय[८६],

नमो नमो मन्म[2]थशंकराय[८७]......।।१५।।

* कंदर्प[3]-सर्पाऽस्त[4]विनाय[5]काय[८८],

मुक्ति[6]सतीक्रोड[7]विनाय[8]काय[८९],।

भव्यात्मनिर्वाणविना[9]यकाय[९०],

नमोऽस्तु सद्दर्शनदायकाय[९१]... ।।१६।।

* वर्याय[९२] लोकोत्तरशासकाय[९३],

दुर्भाव-दारिद्र्य-विनाशकाय[९४],।

वन्द्याय[९५] सन्मार्गप्रकाशकाय[९६],

नमोऽस्तु वैश[10]द्यविकाशकाय[९७]....।।१७।।

* प्रज्ञाजगत्सृट्[11]कमला[12]सनाय[९८],

निवृत्ति पद्माकम[13]लावराय[९९],।

श्रेयोऽब्जलेखा[14]कमला[15]ऽऽकराय[१००],

नमोऽस्तु विद्याकमला[16]-कराय[१०१] ...।।१८।।

* मुक्तिप्रियाऽऽश्लेषकृतोत्सवाय[१०२],

नमो महानन्दमहोत्सवाय[१०३],।

टीप्पणकं :- १. लक्ष्मी, २. कामदेवः, ३. कामदेवः, ४.नाशः, ५. गरुडः, ६. गौरी, ७. उत्संगः, ८. गणेशः, ९. नेतृ, १०. उज्ज्वलता, ११. सर्जकः, १२. ब्रह्मा, १३. विष्णुः, १४. श्रेणिः, १५. सरः, १६. लक्ष्मीकरः,

नमो निरीहाय[१०४] निराश्रवाय[१०५],
नमोनमस्ते जिनवास[1]वाय[१०६].... ।।१९।।

* सिद्धिन्दि[2]राऽऽवास[3]नसार[4]साय[१०७],
स्वमुत्तडागाश्रित[5]सारसाय[१०८],।
विज्ञानहंसाऽऽश्रय[6]मानसाय[१०९],
नमो नमो निर्मल[7]मानसाय[११०]... ।।२०।।

* नमो गताऽनुग्रह[8]निग्रहाय[१११],
तत्वज्ञताशान्त-कदाग्रहाय[११२],।
नमस्तप:शोषितवि[9]ग्रहाय[११३],
नमो क्षमाशामितवि[10]ग्रहाय[११४] .... ।।२१।।

* श्रेय: पुरीप्रापणस्यन्दनाय[११५],
सन्तापनिर्वापणचन्दनाय[११६],।
नरामरेशै: कृतवन्दनाय[११७],
नमोनमस्ते क्षितिनंद[११]नाय[११८] ...।।२२।।

* शान्ताय[११९] दान्ताय[१२०] महोदयाय[१२१],
नि:श्रेयसाप्ताय[१२२] शुभोदयाय[१२३],।
मिथ्यातमोहृत्तपनोदयाय[१२४],
नमोऽस्तु ते लब्धसदोदयाय[१२५]... ।।२३।।

* ये मन्त्रमोंकारवरं नमस्तत् ।
पश्चात्तु सिद्धं हृदये जपन्ति ।
पञ्चाक्षरं ते सततं लभन्ते,
यश:श्रियं शाश्वतसौख्यभाज:.... ।।२४।।

* श्री सिद्धमन्त्रस्य प्रभावतो स्यात्,
रोगा न शोका व्यसनानि नैव,।
पूर्ण: समाधि: सुलभो भवेच्च,
तेनाऽस्य नित्यं स्मरणं विधेयम्...।।२५।।

1. इन्द्र:, 2. लक्ष्मी, 3. निवास:, 4. कमलं, 5. पक्षी, 6. मनाससर:, 7. वित्तं, 8. कृपा, 9. शरीरं, 10. कलह:, 11. प्रीतिद:

## प्रशस्तिः

**सत्तत्वागम**वल्लिवर्धनघन-श्रीवीरभक्त्यार्द्रया,
**श्रीमद्राम-महोदया**ह्व-गणभृच्छ्रद्धाप्रभावाप्तया ।
श्रीगच्छाधिप-**हेमभूषणगुरो** सेवा कृपा-प्राप्तया,
**श्रेयांसप्रभसूरि**पाद-कमलप्रीति-प्रसादाढ्यया।।१।।

सिद्धस्तोत्रमिदं कृतं **रतिकरं** स्मृत्वा सुरीं शारदां,
श्रीमद्वत्सलमानसां **जययुतां रेखा**भिधाऽऽर्यां तथा ।
**शुद्धार्यां** हितकृत्**क्षमानिधि**-पदाम्भोरुड्भ्रमर्या मया,
**सम्यग्दर्शन**लिप्सया **प्रशमवार्निध्यार्यया श्रेयसे** ।।२।।

# श्री सारस्वत स्तवना

- श्रीदर्शनः

* ऐन्द्रवृन्दै र्सदा वन्द्या सेव्याऽऽराध्या च सर्वदा ।
काम्योपास्या च श्रद्धेया, तां वाग्देवीं नमाम्यहम् ।।१।।

* विस्मापयति यत्कीर्त्तिः, स्फूर्त्तिं विश्वे ददाति च ।
मूर्त्तिः ध्येया सदा यस्याः, तां वाग्देवीं नमाम्यहम् ।।२।।

* जाड्यं नश्यति यद्ध्यानात्, प्राज्यं ज्ञानं च वर्धते ।
राज्यं बृहस्पतेर्लभ्यं, तां वाग्देवीं नमाम्यहं ।।३।।

* यन्नाम गृह्यते सद्भिः, गुण्यते स्वहृदि मुदा ।
स्तूयते सत्स्तवैर्नित्यं, तां वाग्देवीं नमाम्यहम् ।।४।।

* यन्नाम स्मरणेन स्याद्, अज्ञानां समयज्ञतां ।
स्फुरेत् विश्वे पराकीर्तिः, तां वाग्देवीं नमाम्यहम् ।।५।।

* अष्टोत्तरशतं ध्यायेन्, मन्त्रं योऽस्याः प्रतिप्रगे ।
सिद्ध - सारस्वतः स्यात् स, तां वाग्देवीं नमाम्यहम् ।।६।।

* शुद्धिः स्यात् जापतो यस्याः, सद्बुद्धि र्वर्धते शुभा ।
श्रद्धाशुद्धिर्भवेद् यस्याः, तां वाग्देवीं नमाम्यहम् ।।७।।

* त्वत्पादाम्बुज - लीनोऽहं, स्तौमि भृंगीव त्वन्मयः ।
**सम्यग्** त्वद् **दर्शनं** देहि, **श्रेयसे** शारदे सदा ।।८।।

# श्री वाग्देवी स्तुत्यष्टकम्

**(उपजाति छंदसि)**

**-मुनिश्री दर्शनरक्षितविजयाः**

सरस्वती या श्रुतदानदक्षा, तीर्थाधिपोक्तत्रिपदीस्वरुपा ।
श्री द्वादशांगी प्रथितागमानां, ज्ञानाय सा मे वरदाऽस्तु नित्यम् ।।१।।

वलक्षपक्षोपरिराजमानां, मनोरमालंकृतिशुभ्रवस्त्राम् ।
संपूर्णचन्द्रोपमवस्त्रभासं, स्तवीमि तां ज्ञानकलानिधानम् ।।२।।

श्री जैनसंघे महिमाऽतिभूत्या, नित्यं प्रभाते स्तुतया मुनीन्द्रैः ।
आराध्यया भिन्नमतैरजस्त्रं, तथा मदीया धिषणाऽस्तु शुद्धा ।।३।।

श्री गौतमर्षेः पदसेविकायै, मुखे मुनीनां सुखखेलिकायै ।
वरप्रदात्र्यै कमलस्थितायै, नमोऽस्तु तस्यै सुखदर्शितायै ।।४।।

सुधीजनानां मुखनर्तिकायाः, सद्भूतमेधाऽऽकरदायिकायाः।
नृपेश्वराऽऽस्थानकशोभितायाः, भूयात् तु यस्या मम शास्त्रबोधः ।।५।।

श्री सूरिमन्त्रस्य रहः स्थितायाः, ॐ ऐं नमो मन्त्रवरैः स्मृतायाः ।
शास्त्रादिबोधे सुमतिप्रदात्र्या, स्तस्याः स्मृति मे हृदये सदा स्यात् ।।६।।

श्रोत्रामृतप्रख्य-विपश्चिधात्र्यां, विशुद्धभावान्नतविघ्नहन्त्र्याम् ।
शास्त्रौघ पाथोनिधि-पूर्णिमायां , तस्यां ममास्था स्थितिमातनोतु ।।७।।

हे शारदे ! सारदयापरे ! त्वं, शिरःकराङ्ध्र्यानन निर्जिताब्जे!।
"**मुक्तिप्रभा**"स्येन सु"**रक्षित**"स्य, करोतु शुद्धां रचनां च मेधाम् ।।८।।

# श्री चारित्र सप्तविंशिका/२

- मुनिश्री सम्यग्दर्शन विजयाः

## मंगलाचरणम् (स्रग्धरा)

ऐन्द्रव्रातेन भक्त्या सुरगिरिशिखरे, वारिधाराऽभिषिक्तः।
कस्तूरी चंदनाद्यैः रुचिररुचिरसैरङ्गरागै र्विलिप्तः ।
शोभामाप्तोऽनवद्यामिव शिवललनोद्वाहसज्जाविशिष्टां।
तं वंदे **पार्श्वनाथं** प्रशमरसमयं, दर्शनेनाऽभिरामम् ।।१।।

## ।। प्रथमया चारित्रनमनम् ।। (उपजातिः)

चारित्रमेतत् सुगुणाऽवतारं, चारित्रमेतत् शमसौख्यकारम् ।
चारित्रमेतत् भवदौःस्थ्यवारं, चारित्रमेतत् त्रिजगत्युदारम् ।।२।।

चारित्रमेतत् मदमानमारं, चारित्रमेतत् स्मरदर्पवारम् ।
चारित्रमेतत् ननु मेरुभारं, स्तुवे सदा तं गुणवृन्दवारम् ।।३।।

## ।। द्वितीयया चारित्रमननम् ।।

चारित्रमाराध्य भजन्ति मुक्तिं, चारित्रमर्चन्तु सुखप्रयुक्तिम् ।
चारित्रमाध्यात्मिकभोज्यभुक्तिं, वहन्तु चित्ते सम-सार-सूक्तिम् ।।४।।

संसारदुःखाकुलविश्वरक्षं, स्व-मोक्ष-सौख्यार्पणबद्धकक्षम् ।
साम्याऽन्तरिक्षोड्ऽयनाय पक्षं, स्पृष्टं मया श्रीचरणं सुदक्षम् ।।५।।

## ।। तृतीयया चारित्रस्मरणम् ।। (शार्दुलविक्रीडितम्)

चारित्रेण विकासमेति भविनां, सद्भावनाः सन्ततिः,
चारित्रेण विलास एव सततं, मोक्षस्थितेरुत्तमः ।
चारित्रेण विनाशमेति विकटा, कर्मावलि र्दुःखदा,
चारित्रेण सुखं च मङ्गलमतः, तेनैव मे मित्रता ।।६।।

चारित्रेण शमस्वभावपटुता, भव्यव्रजः प्राप्नुयात्,
चारित्रेण विरक्तता च सुखकृत्, कल्याणमालाऽश्नुयात्।
चारित्रेण विशुद्धभावजननी, निर्लेपता साध्नुयात्,
चारित्रेण सुखं च मङ्गलमतः, तेनैव मे मित्रता ।।७।।

चारित्रेण विभावनां विदलयन्, जीवः प्रमोदं भजेत्,
चारित्रेण तमोबलं विचलयन्, सद्यो विकारं त्यजेत् ।
चारित्रेण शिवालये विललयन्, श्रेयःश्रिया [1]संयजेत्,
चारित्रेण सुखं च मङ्गलमतः, तेनैव मे मित्रता ।।८।।

चारित्रेण समाधिभावसुलभां, प्राप्नोत्यरं सद्गतिम्,
चारित्रेण समाप्नुवन्ति शिवदां, भव्या ध्रुवं सन्मतिम् ।
चारित्रेण समेत्यहो सरलता-गांभीर्यता सन्ततिः ।
चारित्रेण सुखं च मङ्गलमतः, तेनैव मे मित्रता ।।९।।

### ।। चतुर्थ्या चारित्रवंदनम् ।। (उपजातिः)

सिद्धिप्रिया-सङ्गमयोजकाय, मोहार्य[2]धीनत्ववियोजकाय ।
महोदया[3]नंदप्रयोजकाय, नमोनमस्ते चरणाय नित्यम् ।।१०।।

दुर्भावनाकल्मषवारणाय, सद्भावनामङ्गल तोरणाय ।
भव्यासुमद्दोषविदारणाय, नमोनमस्ते चरणाय नित्यम् ।।११।।

सत्त्वानुकम्पागुणपेटकाय[4], अंतोऽरियुद्धांगणखेटकाय[5] ।
सौजन्यतास्रस्तरलेटकाय, नमोनमस्ते चरणाय नित्यम् ।।१२।।

कल्याणकेलिगृहपक्षकाय[6], शीलाङ्गशिल्पोद्भवतक्षकाय[7]।
मोहोन्दुराऽऽभक्षणतक्षकाय[8], नमोनमस्ते चरणाय नित्यम् ।।१३।।

१. कल्याणलक्ष्म्या संगं करोतीत्यर्थः। २. मोहपारवश्यं दूरीकारकाय ३. मोक्षानंददायिने ४. मञ्जुषा ५. ढाल इति भाषायां ६. द्वारं ७. शिल्पी ८. सर्पः

दुर्वाररागादिविनाशकाय, निर्वाणश्री-सङ्ग-विलासकाय।
मैत्रीप्रसूनालिविकाशकाय, नमोनमस्ते चरणाय नित्यम् ।।१४।।

संसाररत्नाकरशोषकाय, माङ्गल्यमालापरिपोषकाय।
कारुण्यदृष्ट्याऽऽश्रिततोषकाय, नमोनमस्ते चरणाय नित्यम् ।।१५।।

**।। चारित्रस्य विविधोपमाः।।**

**चारित्रं चक्रवर्त्ती (स्रग्धरा)**

**चारित्रं चक्रवर्त्ती** विशदकरुणया, पालयन् जीवलोकम्,
द्वात्रिंशद्-योगसंधावनिपतिनिवहैः, शास्ति धर्मप्रकारैः ।
मुक्ति-स्त्रीरत्न-रागे परिणतमनसा, प्रीतिमानादरेण,
श्रेयःकृद्भिर्निधानैस्सहचरति, नव-ब्रह्मगुप्तिच्छलेन ।।१६।।

**चारित्रं राजहंसः**

**चारित्रं राजहंसो** विनय-सुरभितश्वेतपद्मेऽनुरक्तः,
ज्ञेयोपादेयहेयावगतिसु रमते, बोधचञ्चुप्रयोगात् ।
भक्त्या सार्वागमार्थान् चरति विधियुतो, मौक्तिकानामिवौधम्,
शश्वत्केलिं सरस्सु मुनिनिवहमनस्सु स्वभावाद् दधानः ।।१७।।

**चारित्रं सूर्यः**

**चारित्रं भानुरुद्यद्** गुणकमलवनोल्लासविस्तारकारी,
क्षान्त्याद्यैरात्मदोषापहरणकिरणैरष्टमातृप्रबोधाद्।
सम्यक्त्वोद्योतदायी, दुरितविदलनो, मन्क्षु मिथ्यात्वहारी,
श्रद्धावैशद्यकारी जिनवचनरसाह्लादनिष्ठानुकारी ।।१८।।

**चारित्रं मन्दराद्रिः**

**चारित्रं मन्दराद्रिः** श्रमणसुरगणैः, सेवितो भावभक्त्या,
सिद्धान्तस्वर्णशाली, प्रवचनशिखरं, यस्य, मेधावि-सेव्यं।

स्वाध्यायाराववर्यः प्रवहति सततं, निर्झरो यत्र रम्यः,
तस्मिंश्चारित्रमेरौ वसतिमभिलषेऽहं सदाऽऽब्रह्म[१]लाभम् ।।१९।।

### चारित्रं जातिपुष्पम्

**चारित्रं जातिपुष्पं** प्रशमपरिमलैः, साधुभृंगोपहारं[२],
किञ्जल्के यस्य भक्तभ्रमरसमुदयो, लीयते दुर्निवारं।
श्रेयःसौन्दर्यमस्मिन् चरणकरणजं, भ्राजते सत्[३]-श्रीकारं,
श्री सम्यग्दर्शनाद्यै गुणदलनिचयैः, शोभते दिक्प्रसारम् ।।२०।।

### चारित्रं सहकार-वनम् (शार्दूलविक्रीडितम्)

यत्रार्हत्-गुणगानकोकिलरवश्चेतोहरो धीमताम्,
श्रेयःसद्गुणरागपत्रनिचयो विश्रामदो[४] नित्यशः।
सम्यक्साधुविहंगमाऽऽश्रयवरः, सम्यक्क्रियामञ्जरी।
**चारित्रे सहकारपादपवने**[५], मे क्रीडति मानसम् ।।२१।।

### चारित्रं सिंहः

**चारित्रं नखरायुधश्चरण**[६]-दृग्[७]-मोहेभसंहारकः,
श्रीमत्तीर्थोपदिष्ट शासनवने, स्वैरं भ्रमन् राजते।
संज्ञा-वेद-कषाय-गारव-मृगारातिः सकृद्-भोजकः।
श्रीमद्वीरपदाऽऽस्थितो मम मनश्चित्रं समाकर्षति ।।२२।।

### चारित्रं कमलाकरः

श्रेयः शंकमलानिवासरुचिरः, साधुसुराणां प्रियेः[८],
सुस्वाध्यायशिलीमुखारवसुधी-राजीवराज्या[९] शुभः ।
गुप्तिब्रह्मगुणस्य या नवविधा, यस्याऽस्ति पाली स्थिरा,
चारित्रं कमलाकरः गुणजलाऽऽपूर्णोऽस्तु नः श्रेयसे ।।२३।।

टीप्पनकं : १. मुक्तिलाभपर्यन्तं २.दानं ३.सतां श्रियं करोतीति। ४. छायाप्रद-विश्रान्तिप्रदः ५. आम्रप्रधानं वनं ६. सिंह ७. चारित्रमोह-दर्शनमोहौ एव हस्तिनौ तस्य नाशक इत्यर्थः ८. सुराणां प्रियः ९. स्वाध्यायात्मक-भ्रमरगुञ्जनयुक्त-विबुधकमलश्रेणिः तया ।

## चारित्रं विमलजलम्

**चारित्रं विमलं जलं** गुणकरं सर्वात्मनां सौख्यदम्,
संसाराटनजाऽखिलश्रमहरं, कलेशातपे शैत्यदम्।
सद्भावाऽऽवलिवृक्षवर्धनकरं, मायारजः शामकम्,
दुष्पापाविल-काय-मानसवचो-वस्त्रौधप्रक्षालकम् ।।२४।।

## चारित्रं गगनम्

**चारित्रं गगनं** निराश्रयतया, निर्लेपताभृत्तया,
सर्वाऽऽधारतया सुविस्तृततयाऽनन्तात्मकत्वात्तथा।
नीरुपं विमलत्वभृद् गुणविहंगाली विहाराश्रयं,
चारित्रं नभवद् विभाति हृदये, तत्रैव मे स्तात् स्थितिः ।।२५।।

## चारित्रं चन्द्रः (शार्दूलविक्रीडितम्)

**चारित्रं रजनीपति** बहुतमस्सन्दोहभिल्लीलया,
यस्याऽऽभाति जिनेन्द्रभक्तिरमला-ज्योत्स्ना सतां संपदे।
भव्यप्राणिचकोरवृन्दनयनानन्दो विरागाऽब्धिजः,
विद्यादेववशात्म[१]-षोऽशकलासंसेवितस्सर्वदा ।।२६।।

श्रीसम्यग्मुनि[२] सप्तविंशति गुणै-र्धिण्यै सदा शोभितः,
धीताराधिपतिस्तपो[३] बुधपिताऽऽज्ञारोहिणी वल्लभः।
**सम्यग्दर्शन**-बोधशील-समता-नानौषधीनायकः।
**श्रेयः**कैरव[४] धोरणीं विकसयन् चित्ते सदोदेतु मे ।।२७।।

---

टीप्पनकं : १. देवीविद्यादेववशा=देवी, वशा=स्त्री, देववशा=देवी २. सुसाधुनां सप्तविंशति-गुणस्वरुप-नक्षत्राणां स्वामीत्यर्थः ३. मतिस्वरुप-ताराणां पतीत्यर्थः ४. कुमुदश्रेणिं ।

# निर्वेद द्वात्रिंशिका

-मुनिश्री प्रशमरक्षित विजयाः

निकामकामा नरकं नयन्ति, संसेविता लोलुपभावतो ये ।
तेषां विपाकं परिबुध्य सुज्ञ, मनः सदाचारमयं विधेहि ।।१।।

जानन्ति केचित् सुधियः सुतत्त्वं, ते नोत्सहन्ते परिपालनार्थम् ।
शब्दादिभोगानलतोऽतिदाहे, मोहं महावातसमं त्ववेहि ।।२।।

दौर्गत्यदात्री विषयेषु तृष्णा, संभोगतश्चाऽपि न हीयते सा ।
संवर्धते प्रत्युत तत्पिपासा, कुरङ्गतृष्णेव मरौ नितान्तम् ।।३।।

स्वाचारतो धर्ममलीमसत्वं, कुर्वन्ति बुद्धया परिकल्पिताद् हि ।
धूर्ता मुनेर्वेशधरास्तु लोके, धिगस्तु तेषां विषयाभिलाषां ।।४।।

भोगर्थमेतद् तनु भोगिनां यद्, धर्माथेमेतत् खलु धर्मिणां च ।
जातं तु चैकार्थमहोऽन्तरं यद्, वामस्य कामस्य गति र्विचित्रा ।।५।।

आयुर्हि यात्येव न भोगतृष्णा, गतं वयो नापितु सौख्यकांक्षा ।
तथापि धर्मे न करोसि यत्नं, धिग् जीवितं दुष्कृतगर्हितं ते ।।६।।

निर्णिक्तभावः प्रभुणोक्तशास्त्रे, संसारवार्धौ प्रवरस्तु पोतः ।
स एव ग्राह्य श्च स एव वाच्यस्, तस्यैव सर्वाध्ययनं कुरुष्व ।।७।।

कलत्र-पुत्र-स्वजनेषु मूर्च्छा, चेतोऽम्बरं ते कलुषं करोति ।
सर्वज्ञशास्त्राध्ययनाम्बुना तद्, नेनेग्धि शुद्धयै सततं तु तस्य ।।८।।

भवेऽत्र पुण्ये नृभवस्य प्राप्ति, धर्मोऽर्हतां दुर्लभतेतरां च ।
श्रद्धाऽपि तस्मादतिदुर्लभा हा, तयाऽन्वितं संयमपालनं च ।।९।।

यतस्व धर्मे सततं सुबुद्ध्या, धर्मः फलत्येव सुखं सुखेच्छो !
अर्थेन सौख्यं तु विभाषयैव, कामात्तु सौख्यं किल दुःखहेतुः ।।१०।।

जना यतन्ते सततं सुखार्थं, दुःखप्रणाशाय सदा प्रवृत्ताः ।
धर्मात् सुखं दुःखमहो च पापात्, किं कार्यमत्रेति विचारय त्वम् ।।११।।

ये निःस्पृहास्त्यक्तपरिग्रहाश्च, चारित्रिणः संयमबद्धलक्ष्याः ।
हा! तेऽपि कामोपहता भवन्ति, त्वं नंदिषेणादिमुनीन् तु पश्य ।।१२।।

तदेव दानं हि तपस्तदेव, तदेव शीलं हि स एव भावः ।
तदेव हि ज्ञानमुखं च मन्ये, यतोऽपयायाद्विषयाभिलाषा ।।१३।।

सौख्यं तिलाग्रं गिरिवत्तु दुःख- मादौ सदेष्टं च फले त्वनिष्टम् ।
त्याज्यं तु कन्दर्पविकारचक्रं, विचक्षणैः प्राकृतलोकयोग्यम् ।।१४।।

सौख्यं लभन्ते खलु योगिनो य-दध्यात्मभावैकपरायणा ये ।
तादृक् च सौख्यं न तु चक्रिणां हि, षट्खण्डराज्यादधिकं तदस्ति।।१५।।

षट्खण्डमेतद् बहुभि र्जितं यै, र्देवेन्द्रराज्यं बहुभिश्च लब्धम् ।
हा! तेऽपि नो कामजये समर्था, धिगस्तु तेषामतिकातरत्वम् ।।१६।।

यद् सार्वभौमस्य च वज्रिणश्च, सौख्यं तु रागादिसमन्वितं तत् ।
आध्यात्मिकं यत्तु सुखं मुनीनां, त्रैलोक्यराज्येऽपि न तत्समानम् ।।१७।।

कामारिसंघातरणाङ्गणे तं, संगृह्य जैनेन्द्रवचःकृपाणम् ।
सज्जीभव त्वं त्वरया जयार्थं, वीरत्वकीर्तिं यदि लब्धुकामः ।।१८।।

घ्राणेक्षणस्पर्शरसश्रुतीनां, हा मुग्धचित्ता विषयेषु लुब्धाः।
संसारकक्षे भविनो भ्रमन्ति, कषायचौरैः परिताडिताश्च ।।१९।।

मातङ्गिनीस्पर्शसुखार्थमेव, प्रसारितात्मीयकर: करी य: ।
दु:खानि प्राप्नोति स बन्धजानि , हा कामिनां क्लेशततिं तु पश्य ।। २० ।।

ये चामिषास्वादनलुब्धचित्ता:, पयस्यगाधे विचरन्ति मीना: ।
ते मैनिकस्याऽपि करे पतन्ति, हा निश्चितं तै र्मरणं शरण्यम् ।।२१।।

स गन्धलुब्धो द्विरदस्य गण्डे, मदान्विते संभ्रमत: षडङ्घ्रि:।
तत्कर्णतालातलधातितश्च, मृत्युं तदैव लभते तपस्वी ।। २२ ।।

सुवर्णसंकाशहुताशनार्चि-रालोकमूढो लभते पतङ्ग: ।
दीपे पतन्नेव मृतिं स तूर्णं, धिक् कामिन: कामपरैकचित्तान् ।। २३ ।।

कर्णप्रियारावपर: कुरङ्ग:, स गीतिमाकर्णयितुं प्रयात: ।
आकर्णमाकृष्टशरासनस्य, व्याधस्य वैध्यत्वमहो प्रयाति ।।२४ ।।

एकैक एवं विषय: प्रभुक्त:, पंचत्वहेतु: भविनामवश्यम् ।
कथं पुनस्ते युगपत् प्रभुक्ता:, पंचत्वहेतु: खलु पंच न स्यु: ।।२५।।

स्त्रीवक्त्रनेत्रादिमनोहराङ्गै, र्विमोहिता: किन्न समाचरन्ति ।
ब्रह्माऽपि जानाति न तद्वृदन्तं, हा कामिनीभि र्नटितं जगद् हि ।।२६।।

वार्भि र्न तृप्तो जलधि: कदापि, काष्टै र्न तृप्तो हुतभुक् कदापि ।
खाद्यै: पदार्थैरुदरं न तृप्तं, तथैव जीवो विषयैर्न तृप्त: ।।२७।।

कामप्रसक्ता खलु कामिनो ये, पश्यन्ति यां यां रमणीं सुरम्यां ।
चेतस्तु तां तामनुधावति द्राग्, न ज्ञायते कामविडम्बना तै: ।।२८।।

अन्यत् तु चित्ते वचनेऽपि चान्यत्, क्रियासु चान्यद् ननु कामिनीनाम् ।
स्वभावसिद्धं खलु सर्वमेतत्, कस्तासु रन्तुं स्वमनो विदध्यात् ।।२९।।

निरङ्कुशैरुत्पथगामिभिश्च, प्राकृष्य तैरिन्द्रियवाजिवर्गैः।
दुःखातिकीर्णां नरकाटवीं तां, जीवो वराकोऽहह नीयतेऽयम् ।।३०।।

धन्यास्तु ते नौमि पदं च तेषां, नाकर्षते यद्हृदयं तु कामैः ।
धन्यास्तु बालव्रतिनस्ततोऽपि, नास्वादितं वैषयिकं सुखं यैः ।।३१।।

गुरोः पार्श्वे नित्यं, शृणु तु जिनसिद्धान्तवचनं,
चिकीर्षुश्चित्तं ते, विषयपरिहारं यदि भवेद्।
**प्रभायुक्तो मुक्ति** – र्मुनिपतिरयं मे गुरुवरः,
प्रसादात् तस्यैवं, **प्रशम**मुनिनाऽयं विरचितः ।।३२।।




प्रकाशकम्
जगद्गुरु पू.आ.श्री
विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्
पालडी-अहमदाबाद

Matiksha
M.: 9820715236